Shri Raghunath Temple MSS. Library,
JAMMU

No. १४८६

Title सिद्धान्त लक्षणम्

Author ×

Extent ३६ Age ×

Subject न्याय वैशेषिकं

© Dharmartha Trust. Digitized by eGangotri

सिद्धांतलक्षणविचारः

१४७८

© Dharmartha Trust. Digitized by eGangotri

श्लोक ८३६

© Dharmartha Trust. Digitized by eGangotri

१ श्रीगणेशाय नमः॥ अत्र वदंति प्रतियोग्यवृत्तिधर्मावच्छिन्नप्रतियोगिताकाभावे प्रमाणाभावात्
ग्म· लक्षणानि तन्निर्दुष्टानि। न चात्र प्रत्यक्षं प्रमाणं अभावलौकिकप्रत्यक्षे प्रतिप्रतियोगिता
वच्छेदविशिष्टप्रतियोगिज्ञानस्य हेतुतया तदसम्भवेन तत्र प्रतियोगितोत्यक्षासंभवात्· न चाभाव
लौकिकप्रत्यक्षे प्रतिप्रतियोगितावच्छेदकविशिष्टप्रतियोगिज्ञानं न हेतुः घटत्वेन पटस्यापि
प्रतियोगितासंबंधेन घटत्वेन पटावगाहिनो घटाभावभानस्योदयात् किंतु प्रतियोगितावच्छे
दकप्रकारकज्ञानमेव तथा च तथाप्रवृत्तेपि घटत्वेन पटावगाहिनो घटाभावभानस्योदयात्
किंधमस्य संभवात् व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकाभावलौकिकप्रत्यक्षस्यासंभ
वं धीविशेष इति वाच्यं अभावप्रत्यक्षं हि प्रतियोगितिषप्रकारतावच्छेदकांशे प्रतियोगितावच्छेद
कत्वावगाहित्वनियमात् तेन मम वगाहते प्रतियोगितासंबंधावच्छिन्नतद्धर्मावच्छिन्नप्रकारताशा
लिप्रत्यक्षस्यावत्तद्धर्मनिष्ठप्रतियोगितावच्छेदकत्वावगाहित्वनियमात् अतएव दीधितिका राम १

© Dharmartha Trust. Digitized by eGangotri

रेऽपि अभावप्रत्यक्षे हि घटत्वविशिष्टस्य घटादेः प्रतियोगित्वमवगाहमानो विशेषणस्याविघ
टत्वादेस्तत्रावच्छेदकत्वमवगाहि तेन स्थानेऽयं घटो नास्तीत्येव प्रतीतेरित्युक्तत्वात् । नच
तस्मान्नियमात्ताभावस्यात्तं अंशे तस्य न घटत्वविशिष्टस्यावगाहित्वं विना घटत्वावच्छिन्न
प्रतियोगित्वमवगाहते तदर्थं तथा घटो नास्तीत्येव प्रतीतेरित्यस्य घटत्वविशिष्टघटावगाहि
त्वभावप्रत्यक्षे एव घटत्वावच्छिन्नप्रतियोगितावगाहित्वनियमादित्यर्थं विनाऽन्यथाऽसंभा
वात् । तथा च व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकाभावप्रत्यक्षे यदि व्यधिकरणधर्मवि
शिष्टप्रतियोगित्वं नावगाहते तावगाहते तदा व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकत्वं
प्रदर्शितनियमात् अन्यथावगाहित्वे व्यधिकरणधर्मविशिष्टप्रतियोगिनं तर्हि तथाविधा
भावप्रत्यक्षमप्रमाणमलमेव तस्मात् व्यधिकरणधर्मावच्छिन्नप्रतियोगितासिद्धिरिति व्य
धिकरणधर्मावच्छिन्नप्रतियोगिताकाभावो न प्रत्यक्षगम्यः । अथ घटत्वेन पटमवगाहितो

© Dharmartha Trust. Digitized by eGangotri

ऽभावेघूमानयस्य घटत्वांशे भ्रमत्वं ननु घटत्वनिष्ठाभावप्रतियोगितावच्छेदकत्वांशेपि व्यधिक
रणधर्मावच्छिन्नप्रतियोगिकाभाववादिभिरसौ न प्रतियोगितावच्छेदकत्वांगीकारात्तथा च घ
टत्वेन घटनावगाहि घटत्वावच्छिन्नप्रतियोगिताकाभावप्रत्ययवत्वात् घटत्वेन तथाविधप्रति
योगितावच्छेदकत्वसिद्धेर्बाधकाभावदिति चेन्न तोसिनहि वयं तथाविधाभावप्रत्ययो घटत्वे नप्रा
वगाहित्वं प्रामाण्यं गृह्णति तथाविधाभावप्रतियोगितावच्छेदकत्वं घटत्वे तस्मात्त्वंनास्ति घटो तिवुद्धी
येनोक्तानुपपत्तिः स्यादपि तु याकिंचित्प्रतियोगितायाव्यधिकरणधर्मावच्छिन्नत्वस्याभावेन
तथाविधप्रतियोगिताकत्वस्य कल्पने गौरवेणप्रतियोगिताव्यधिकरणधर्मप्रतियोगितावच्छे
दकत्वं नास्तीतिरनुपपत्तिमुपगतवांस्तथा च तथाविधाभावप्रत्ययस्य प्रतियोगितावच्छेदकत्वांश
विषयकत्वान्न तस्मात्प्रतियोगिताव्यधिकरणधर्मप्रतियोगितावच्छेदकत्वसिद्धिरिति न तत्र
प्रमात्वं तत्प्रामाण्यावगाहनाद्यदि च तथाविधाभावप्रत्यये प्रतियोगिताव्यधिकरणधर्मावच्छिन्न राम

© Dharmartha Trust. Digitized by eGangotri

प्रतियोगिताकत्वांशेपि प्रमात्वानुभवः सर्वलोकानां तदा तु तादृशाभावोऽवश्यमभ्युपेयः न च तथाविध
प्रमात्वानुभवस्यापि भ्रमतया न तथात्वमिति वाच्यं तथा सति प्रतीत्यापदार्थसिद्धिलोपापत्तेः। अन्तरा
वदीधितिकारोपि यदि पुनरनुभविको लोकानां स्वरसवाही घटत्वेन पटो नास्तीत्यनुभवस्तदा तादृशा
भावनिवारणं जीवशिरोगुरूणामप्यशक्यमित्युक्तवानिति यत्तु। शशशृंगो नास्तीति शाब्दत्वात्तथाविधा
भावसिद्धिः शशीयत्वविशिष्टशृंगाप्रसिद्ध्या तत्समानाधिकरणधर्मावच्छिन्नप्रतियोगिताकाभा
वप्रत्यक्षस्यापासंभवेन शशीयत्वावच्छिन्नशृंगनिष्ठप्रतियोगिताकाभावस्यैव न ज्ञानप्रतीतिविष
यत्वादिति तन्न तादृशशब्दजन्यप्रतीतेः शृंगे शशीयत्वाभावविषयकत्वेनाप्युपपत्तेः तत्समानाधि
करणधर्मावच्छिन्नप्रतियोगिताकाभावासिद्धेः न च गोनिष्ठाभावीयशृंगनिष्ठप्रतियोगितायां
शशीयत्वावच्छिन्नत्वावगाहि प्रतीतिः ज्ञानको गविशाणशृंगं नास्तीति शब्दस्तत्र प्रमाणमिति वाच्यं
तथाविधाभावस्यैवाप्यशृंगनिष्ठप्रतियोगितायां शशीयत्वावच्छिन्नत्वावगाहिनः प्रमात्मकप्रत्ययस्य

© Dharmartha Trust. Digitized by eGangotri

तस्मादनभ्युपगमात्तन्मात्त्रवस्तुसिद्धिर्नास्तीति घंटाघोषस्य शास्त्रप्रसिद्धत्वात् अनुमाने तु अव्यभि
३ चारिलिंगाद्यभावादसंभवीति तत्तस्मादपि तत्सिद्धिरित्यलमतिविस्तरेण यत्तु मास्तु व्यधिकरणध
र्मावच्छिन्नाभाववत्तथापि व्याप्तिलक्षणं न दुर्वचं विशेषणताविशेषसंबंधेन साध्यवदवृत्तत्वाये
3 पदार्थाः विशेषणताविशेषसंबंधावच्छिन्नतदभाववत्त्वं घटदधिकरणताव्यापकं तत्त्वस्यैव तल्लक्षण
त्वसंभवादिति तदप्यसत् साध्यवति ये ये पदार्थाः विशेषणताविशेषसंबंधेन वर्त्तते तथाविधतथाभाव
कूटस्य दुर्ग्रहत्वेन तथा लक्षणे न सत्तदभावकूटस्य निवेशासंभवात् न च तत्संबंधावच्छिन्नसाध्यवद्व
त्तित्वावच्छिन्नप्रतियोगिताकाभावस्य निवेशान्नानुपपत्तिरिति वाच्यं केवलान्वयिसाध्यकस्थले तद्वि
शेषणताविशेषसंबंधावच्छिन्नं यत्तद्वृत्तिमत्त्वं तदवच्छिन्नप्रतियोगिताकाभावाभिन्नतया तस्यात
थागाधेयगुरुधर्मावच्छिन्नप्रतियोगिताकत्वविरहेण तथाविधाभावाप्रसिद्ध्याऽव्याप्तिरिति अन्ये तु साध्यता राम
वच्छेदकसंबंधेन यत्साध्याधिकरणं तदेकत्वावि तन्निरूपितयद्वृत्तितावच्छेदकसंबंधावच्छिन्नवृत्ति ३

© Dharmartha Trust. Digitized by eGangotri

त्वंतदभावव्यापकतावच्छेदकहेतुतावच्छेदकसंबंधावच्छिन्नपदेत्वधिकरणतात्र्यनिरूपि
तहेतुतावच्छेदकसंबंधावच्छिन्नवृत्तित्वाभाववत्वं तत्वं साध्यतावच्छेदकसंबंधेन साध्या
धिकरणत्वनिवेशात् समवायेन पृथिवीत्वादेः साध्यतायां कालिकसंबंधेन व्यभिचारिणि
हेतौ घटादौ नातिव्याप्तिः हेतुतावच्छेदकसंबंधेन प्रथमवृत्तित्वनिवेशात् द्रव्यं सत्त्वादित्या
दौ नातिव्याप्तिः हेतुतावच्छेदकसंबंधेन हेत्वधिकरणत्वनिवेशात् संयोगेन व[illegible]देः साध्य
तायां समवायेन वर्तीयस्त्यसद्धेतौ नाव्याप्तिः हेतुतावच्छेदकसंबंधेन द्वितीयवृत्तित्वनि
वेशात् कालो घटवान् कालपरिमाणादित्यादौ नाव्याप्तिरिति वदंति। तदसत्। एतद्रूपभिन्न
गुणत्वादित्यादावतिव्याप्तेः एतद्रूपमात्रसमवेतात्र्प्रसिद्धात् तथाविधसामानाधिकरण्याभा
वस्य हेतुसामानाधिकरण्याभावव्याप्यत्वात्। यदि चोभयदले वृत्तित्वं विशेषणताविशेष
संबंधेन विवक्षितं तदानुव्याप्तेर्विशिष्टैकरूपत्वानित्वांहीऽयमिति दोषश्च परिचिंतनीयः। गु

© Dharmartha Trust. Digitized by eGangotri

२४ 5

रूतयासतद्दिशव्याप्तिज्ञानस्यानुमित्यहेतुतया अनुमितिजनकज्ञानविषयव्याप्तिजिज्ञासा
यां तन्निरूपणप्रस्तावे अन्यादृशस्यानाकांक्षितत्वादिति केचित्तु साधनसमानाधिकरण
यावद्धर्मानधिकरणमात्रवृत्तितानवच्छेदकयत्साध्यतावच्छेदकं तदवच्छिन्नसामानाधि
करण्यं व्याप्तिः। पावत्वनिवेशात्तद्रूपवान्वह्नेरित्यादौ नातिव्याप्तिः। मात्रपदनिवेशात्द्रव्यं
पृथिवीत्वाद्धेत्वादौ नाव्याप्तिः साध्यतावच्छेदके तादृशवृत्तितानवच्छेदकत्वनिवेशात्तद्रूप
वान् पृथिवीत्वाद्धित्यादौ नाव्याप्तिः अवच्छेदकत्वं च नान्यूनवृत्तित्वं धूमवान्वह्नेरित्यादा
वतिव्याप्तेः। किं त्वनतिरिक्तवृत्तित्वं तच्च तद्घटत्व धर्मावृत्तित्वं धर्मपदनिवेशात्गुणत्वाघनै
समवायेनद्रव्यत्वसाध्यतायां प्रमेयत्वादिव्यभिचारिहेतोसी धनसमानाधिकरणयावद्धर्मं
तिः पातिगुणत्वाघनधिकरणमात्रवृत्तित्वाभाववत्तिवृत्तिमत्वरू अवृत्तिमत्वे गगनादेर
व्यत्वरूपसाध्यतावच्छेदकस्यावृत्तिविषयिनाति व्याप्तिः तथापि धववृत्तित्वाभाववृत्तिवृत्तिमत्व

© Dharmartha Trust. Digitized by eGangotri

रूपधर्मत्वविशिष्टस्यात्यस्यावृत्तित्वेन तद्भिन्नत्वविरहादिति । अथ तथाविधयावद्धर्मानधिक
रणमात्रवृत्तित्वमिह न तथाविधयावद्धर्मानधिकरणोत्तरावृत्तित्वमात्रमेवोच्यते न तु तदधि
करणमात्रवृत्तित्वांशोपि तत्र निवेश्यते प्रयोजनाभावात् तत्र च धर्मपदं व्यर्थं उपदर्शितस्थ
लेऽवृत्तिगगनादेस्तथाविधयावद्धर्मानधिकरणोत्तरावृत्तित्वेन तदभावविरहादुपदर्शित
रीत्याऽतिव्याप्त्यसंगतेरिति चेन्नैवं । तात्पर्याथ्यानाकलनात् । तथाहि । तथाविधयावद्धर्म
तिधिकरणोत्तरावृत्तित्वमित्यत्र वृत्तित्वं न संबंधसामान्येन धूमवान्वह्नेरित्यादावतिव्याप्तेः किं
तु साध्यतावच्छेदकसंबंधेन तद्वाच्यं तथा सति संयोगसंबंधेन द्रव्यस्य साध्यतायां मेयत्वरू
पहेतौ व्यभिचारिण्यतिव्याप्तेः । कथं सेति चेन्न दर्शितं हि । तथाविधयावद्धर्मतियातिकेवलान्व
यिधर्मेमात्रयासंभवेन यावत्पदस्य तथाविधपारिभाषिकावच्छेदकभेदकूटनिवेशस्फोर

© Dharmartha Trust. Digitized by eGangotri

कत्तपातस्थाविधभेदकूटविसोधप्रसादयत्तावच्छेदकं तदवच्छिन्नसामानाधिकरण्यं व्याप्तिरि
५ त्युपेमं तथा चोपदर्शितस्थले ऽतिव्याप्तिः गुणत्वानधिकरणेतरगुणनिरूपितसंयोगसंबंधा
वच्छिन्नवृत्तित्वाप्रसिद्ध्यात्तत्र साधनसमानाधिकरणगुणत्वमादाय निरुक्तपारिभाषिकाव
5 च्छेदकत्वोपपादनस्य दुर्व्यत्वेऽशक्यत्वेनानादेरेव तथाविधपारिभाषिकावच्छेदकतयामन्ते
दकूटस्य परव्यन्त्वे सत्वादिति साधनसमानाधिकरणधर्मानधिकरणेतरनिष्ठान्योन्याभावप्रति
योगितानवच्छेदकत्ववृत्तिमत्त्वोभयाभावरूपाव्याप्यायकं प्रवृत्तिं चेतनस्य देकूटस्य मवश्यलक्ष
णे निवेसनीयं एवं च वृत्तिमत्त्वरूपधर्मत्वनिवेशो नावश्यकः अन्यथा रव्यावान्मेयत्वादित्य
त्र मेयत्वाश्रये गगनतथाविधगुणत्वानधिकरणेतरत्वस्य अन्योन्याभावप्रतियोगितानवच्छे
दकत्वाभावाभावेन तथाविधत्वाश्रये गगनभेदकूटस्यरूपत्वे ऽसत्तया ऽतिव्याप्तिवारणाय राम
लक्षणो व्यशक्यमिति मनोरमः पंथाः = केचित्तु तदनधिकरणमात्रवृत्तित्वमित्यनेनस्व ५

© Dharmartha Trust. Digitized by eGangotri

व्यापकतदनधिकरणत्ताकत्वस्यविवक्षिततयामत्वसंगतधर्मपदसाध्यक्यसत्वोपप
त्तेःतवतादृशामत्वसंगमनस्यतदनधिकरणेतरावृत्तित्वनिवेशेनापिसंभवान्नैरुक्ते
वैयधिकरण्यनिवेशपधर्मपदोपादानमयुक्तमितिवाच्यंतदनधिकरणतरावृत्ति
त्वभिन्नस्यतदनधिकरणेतरवृत्तित्वप्रतियोगिकभावार्थकत्वेनतादृशव्याप्यवृत्ति
धर्मावच्छिन्नाभावस्यतत्समानाधिकरणासाधारणतयातच्छचाप्रसिद्धेःतादृशवृत्तित्वत्वा
वच्छिन्नाभावार्थकत्वेतादृशवृत्तित्वत्वस्यस्वसमानाधिकरणतदधिकरणवृत्तित्वत्वापेक्ष
यागुरुशरीरत्वेनाभावप्रतियोगितानवच्छेदकतयातादृशाभावाप्रसिद्ध्याऽनुपपत्तेरित्याहुः
= यत्तुगुणकर्मान्यत्वविशेषिभावान्जातेरित्यादावतिव्याप्तिवारणाययथावस्त्वाश्रापाधि
करणतायातथाविधान्योन्याभावप्रतियोगितानवच्छेदकत्वाभावविवक्षायामावश्यक
कत्वेनैवसर्वसामंजस्येवृत्तिमत्त्वविशेषणव्यर्थमवेतितदसत्तथाविधान्योन्याभा

© Dharmartha Trust. Digitized by eGangotri

यप्रतियोगित्तावच्छेदकतायांश्चवृत्त्यपविव ष्ठाणीयसाध्यतावच्छेदकसंबंधविच्छिन्न
त्वेनैवतत्त्वातिव्याप्तिवारणात्। तथाहि-ऽव्यदसितैपांश्चवस्[redacted]ष्ठाणीयसा) रघुले
६ गुणाकर्मान्यत्वविशिष्टसत्तापुरिसमवायसंबंधेनसाध्यतानवच्छेदकजातिरूपहेतोः स
6 द्व्यनुत्वाधत्तिःसमवायसंबंधेनजात्याधिकरणोसर्वेचसमवायसंबंधेनसत्तोरूपवि
शिष्टसत्तायाःसत्वादितिरव्यमाचवृत्तिविलक्षेणाधिकरणतासंबंधेनेवविशिष्टस
त्तायास्तत्रसाध्यत्वमवश्यमुररीकरणीयंततश्चाचतत्राविा धगुणात्वानधिकरणोतर
गुणानिष्ठान्योन्याभावायप्रतियोगितायाःसाध्यतावच्छेदकसंबंधावच्छिन्नविछे
दकतायाविशिष्टसत्तायांसत्वेतविशिष्टसतोत्वाश्चयेतत्राविधानवच्छेदकत्वविर
हवृत्तयास्तस्यपारिभाषिकावच्छेदकत्वेनातिव्याप्तिविरहइतिःस्वाश्रयत्वसाध्यता
वच्छेदकताघटकसंबंधेनबोदयेनातोऽव्यत्वसत्वोभयनानजातेरित्यादावतिव्या राम
प्तिरितिःशृतेनरातल्लक्षणव्यारव्यानानसंबंधेनवोदयंनातोरव्यात्यसत्वैरेदाधिकिका ६

रीयवस्तुनस्त्वित्वादिगगनघश्चितं नापरस्याहुः तदप्यसत् अनुमितिजनकीभूतज्ञानवि
षयीभूतव्याप्तिस्वरूपनिरूपणप्रस्तावेऽतस्य व्याप्तिः चेन्न निरूपणेऽर्थान्तरप्रसंगात् गौ
रवेणाशातरज्ञानस्यानुमित्यहेतुत्वात्ः अथोपाद्यभावविशिष्टसाद्यसामानाधिकरण्य
व्याप्तिः उपाधिमत्ताद्यव्यापकत्वे सति साधनाव्यापकः व्यापकत्वं च तद्वन्निष्ठात्यन्ताभावाप्र
तियोगित्वं नो भावप्रतियोगितावच्छेदको भजौ तथा च साध्याधिकरणनिष्ठात्यन्ताभावप्र
तियोगितानवच्छेदकत्वे सति साधनाधिकरणवृत्त्यत्यन्ताभावप्रतियोगितावच्छेदकाभू
तायेये धर्मास्तदीयाभाववद्वित्तित्वसामानाधिकरण्यं व्याप्तिरिति लक्षणनिरूष्टं
अत्र प्रतियोगित्वं न तावत्तदभावाधिकरणावृत्तित्वं कपिसंयोगाद्यभावीयप्रतियोगिन्यव्या
प्तेः न चैकदेशकालावच्छेदेनेतिवृत्तित्वं विशेषणीयमिति वाच्यं अन्योन्याभावप्रतियो
गिन्यव्याप्तेः न च येन संबन्धेन यदभावाधिकरणावृत्तित्वं सतेन संबन्धेन तदभावप्रतियोगि
तित्वलक्षणाकरणान्नोक्तदोष इति वाच्यं तथाप्यन्योन्याभावप्रतियोगितावच्छेदकेऽति

© Dharmartha Trust. Digitized by eGangotri

१ व्याप्तेः। नच स्वीययदभाववृत्तियेनसंबंधेनयत्समवेतंतत्तेनसंबंधेनतत्त्वंतदभावप्रतियोगी
तिवाच्यंतथापि समवायसंबंधावच्छिन्नप्रतियोगिताकसत्ताभावाप्रतियोगित्वव्याप्तेः सत्ता
भाववन्निरूपितसमवायसंबंधावच्छिन्नीयवृत्तित्वाप्रसिद्धेः। यत्तु तत्संबंधावच्छिन्नप्रतियोगि
७ ताकतदभावाभाववत्त्वमेव तत्संबंधावच्छिन्नतदभावीयप्रतियोगित्वं अथवान्योन्याभावीयप्रति
योगितत्प्रतियोगितावच्छेदकयोरप्रसक्तेतिप्रसक्तौ न च प्रकृतलक्षणाप्रविष्टान्यताभावीयप्र
तियोगित्वजिज्ञासयातन्निरूपणप्रस्तावे तस्यैव तल्लक्षणलक्ष्यत्वेनोक्तानुपपत्तिरिति वा
च्यंतथासति व्याप्तिलक्षणेऽस्य न पदस्य नैरर्थक्यात्। भेदप्रतियोगिनस्तथाविधाभावाभा
वत्वविरहेणैवावारणात् भवदन्योन्याभावायप्रतियोगिताभावादायानुपपत्तिविरहात् अ
न्योन्याभावीयप्रतियोगिनो विलक्ष्यत्वे तु अन्योन्याभावायप्रतियोगितावारणाय लक्ष राम
णेऽन्यतपदं सार्थकमिति। न च भेदप्रतियोगितासाधारणप्रतियोगितायालक्षणेनिवे ७

© Dharmartha Trust. Digitized by eGangotri

शेपित्वस्थलेऽत्यंतपदं निरर्थकमेवं सर्वत्र व्यभिचारिणि साध्यसाध्यवदन्यतरस्यैवोपा
धितासंभवेनातिव्याप्तिविरहान्तरमिति वाच्यं धूमवान् वह्नेरित्यादौ तथाविधान्यतरस्य का
लिकादिसंबंधेन साधनव्यापकतयाऽपाधित्वासंभवेनातिव्याप्तिवारणासंभवात् नच न
चापि तथाविधान्यतरेण कालिकादिसंबंधेन साधनव्यापकः साधनाधिकरणीभूता
काशादौ केनापि संबंधेन तथाविधोपाधेरसत्वादिति नोक्तानुपपत्तिरिति वाच्यं तथावि
धं जन्यत्ववत्पृथिवीत्वादित्यादौ साधनव्यापकतया जन्यत्वजन्यत्ववदन्यतरादे
रुपाधित्वासंभवेनातिव्याप्तेर्वज्रलेपत्वात् अत्यंतपदनिवेशे तु तत्र व्यभिचारनिरूपा
धिकरणपरमाणुभेदस्यैवोपाधितासंभवेनातिव्याप्तिविरहात् नच परमाणुभेदस्यापि मूर्त
मात्रवृत्तपदिगुणाधिनिष्ठदैशिकविशेषणतासंबंधेन साधनव्यापकत्वादुपाधित्वासंभवं

© Dharmartha Trust. Digitized by eGangotri

८ इतिवाच्यं कालिकविशेषणतादैशिकविशेषणतातादात्म्यातिरिक्तवृत्त्यनियाम
कसंबंधातिरिक्तसंबंधेन साध्यव्यापकत्वं साधनाव्यापकत्वयोर्निवेशादिति चेन्न स्वा
४ भावविषयतावच्छिन्नप्रतिबध्यतानिरूपितप्रतिबंधकतावच्छेदकाभावविषयतावि
शिष्टस्वत्वस्य स्वाभावविषयकज्ञानविशिष्टस्वत्वस्यैव वाभेदप्रतियोगिसाधारण
लक्षणत्वसंभवेनोक्तानुपपत्तेरभावादिति तदसत् स्वाभावेत्यत्र लुप्तषष्ठ्यो स्वार्थप्र
तियोगितादिघटितत्वेन प्रतियोगितालक्षणस्यात्माश्रयप्रसंगात् नच लक्षणप्रवि
ष्टप्रतियोगित्वे स्वरूपसंबंधविशेष इति नोक्तदोष इति वाच्यं प्रतियोगित्वस्य स्वरूप
संबंधविशेषरूपावश्यकत्वे प्रकारान्तरेण तन्निर्वचनरूपक्लेशमात्रसंपादकत्वात् केचि
त्तु प्रवृत्ते तदभावाभावत्वमिव तदभावप्रतियोगित्वं अत्र लक्षणे नाभावप्रतियोगिमात्रस्यैत राम
ल्लक्षणलक्ष्यत्वान्नान्योन्याभावप्रतियोगिन्यव्याप्तिः नचैवं सति लक्षणे तन्नपदं निर ८

© Dharmartha Trust. Digitized by eGangotri

र्थकमिति वाच्यं एकसंबंधेन साद्यव्यापकस्य संबंधांतरेण साधनाव्यापकस्य सद्भेनोस
त्वेनासंभव वारणाय साद्यव्यापकत्वसाधनाव्यापकत्व घटकीभूताभावप्रतियोगितयो
रेकसंबंधावच्छिन्नत्वस्य विशेषणानां विशेषसंबंधावच्छिन्नत्वस्य वा अवश्यं विव
क्षणीयत्वेन भेदप्रतियोगितासाधारणप्रतियोगितायां निवेशेपि लक्षणेऽत्यंतपदनैरर्थ
क्यस्यावश्यकत्वादित्याहुः भेवं सद्धेतुस्थले साद्यव्यापकसाधनाव्यापकाप्रसिद्ध्या लक्ष
णेऽसंभवान् न च स्वव्यापकाव्याप्यत्वसंबंधेन साद्यविशिष्टयत्तत्सद्देवकूटत्वस्यैव
प्रकृतेऽनौपाधिकत्वरूपत्वान्न दोष इति वाच्यं ज्ञानस्य। विशिष्टबुद्धिनियामकत्वेन संबंधत्वा
भावात् तथाविधभेदकूटस्य दुर्ज्ञेयतया लक्षणे निवेशासंभवाच्चेत्यलमधिकावेशेन अ
परे तु साद्यसामानाधिकरण्यविषयकज्ञानस्यानुमितिहेतुत्वात् साद्यसामानाधिकरण
यमेव व्याप्तिः न चात्र दुःसंभवा न वह्निरित्यत्र व्याप्तिर्महानसीयवह्नित्वादिना महानसीयव

© Dharmartha Trust. Digitized by eGangotri

डेरपि द्रव्यव्याप्यत्वेनातिव्याप्त्यनवकाशात्। तद्धर्मावच्छिन्नत्वमिति चेत् तद्धर्मावच्छिन्नविरूपित
व्यादिनौ सेत्स्यत्साध्याभावाधिकरणावृत्तित्वानवच्छेदकीभूतहेतुतावच्छेदकवत्त्वसाधनव्या
१० पकसाध्यसामानाधिकरण्यत्वादिना विशिष्यनिर्वचनीयत्वेनानुपपत्त्यभावात्। तस्मादाहुः
तदसन्। विशिष्यव्याप्तित्वग्रहणस्यावश्यकत्वे सामानाधिकरण्यमात्रस्य व्याप्तित्वे माना
भावात्। न च तज्ज्ञानमनुमितिं प्रति हेतुरिति तस्य व्याप्तित्वमावश्यकमिति वाच्यं। सामानाधि
करण्यज्ञानस्यानुमितिहेतुत्वे व्यभिचारज्ञानकालेप्यनुमित्यापत्तेः। न च व्यभिचारज्ञाना
भावविशिष्टसामानाधिकरण्यज्ञानस्यानुमितिहेतुत्वान्नानुपपत्तिरिति वाच्यं। हेत्वन्तरे प्रवृ
त्तहेतौ रूपान्तरेण वाव्यभिचारज्ञानकाले सामानाधिकरण्यज्ञानादनुमित्यनुदयापत्तेः। अ
थ तद्धर्मावच्छिन्नविशिष्यकव्यभिचारज्ञानाभावविशिष्टतद्धर्मावच्छिन्नविशेष्यकसाध्य १०
सामानाधिकरण्यनिर्णयाव्यवहितोत्तरानुमितिं प्रति तद्धर्मावच्छिन्नविशेष्यकव्यभिचारज्ञा

© Dharmartha Trust. Digitized by eGangotri

नाभाववविशिष्टतद्रूपावच्छिन्नविशेष्यकसाध्यसामानाधिकरण्यनिश्चयस्येतिज्ञेयत्वेनेहेतु
त्वान्नोक्तानुपपत्तिः। नचैवंसतिहेत्वतावच्छेदकाविषयकान्तसाध्यसमानाधिकरणवान्
पर्वतइतिज्ञानादनुमित्यनुपपत्तिरितिवाच्यं हेत्वतावच्छेदकविषयत्वानिवेशेपसाध्यसा
मानाधिकरण्यातिरिक्तधर्मानवच्छिन्नविशेष्यताकव्यभिचारज्ञानाभावविशिष्टसाध्
यसमानाधिकरण्यातिरिक्तधर्मानवच्छिन्नप्रकारताशालिनिर्णयाव्यवहितोत्तरानु
मितिप्रतितद्व्याविधनिर्णयत्वेनापिहेतुत्वादस्यकल्पनायत्वादितिचेन्न। व्यभिचारज्ञानः
प्रामाण्यनिर्णयसत्वेसामानाधिकरण्यज्ञानापिहेदनुमित्युत्पादात् अप्रामाण्यनिर्णयाभा
वविशेषव्यभिचारज्ञानस्यैवतत्रोत्तेजकत्वेनगौरवात्। नचसंशयसाधारण्याप्रामाण्य
ज्ञानाभावस्यैवनिवेशोऽस्त्विति वाच्यं तथासति अप्रामाण्यसंशयजन्यव्यभिचारसंशय
कालेऽनुमित्यापत्तेः। नचान्यथानुपपत्त्याऽप्रमाण्यनिर्णयाभावविशिष्टव्यभिचारज्ञा

© Dharmartha Trust. Digitized by eGangotri

नाभावविशिष्टसाध्यसामानाधिकरण्यज्ञानस्य हेतुत्वं कल्पनीयमिति वाच्यं। तद्रूपेणोपा
साध्याभाववदवृत्तित्वरूपसाध्याव्यभिचारित्वविशिष्टसाध्यसामानाधिकरण्यज्ञा
१० नस्यैवानुमितिहेतुत्वे लाघवात् न चात्रापि अव्यभिचारित्वांशे निर्णयत्वनिवेशानु
त्यमिति वाच्यं अव्यभिचरितत्वनिर्णोपायेष्वव्यभिचारज्ञाननिष्ठाप्रामाण्यनिर्णा
10 यशरीस्य अतिगौरवादिति। अत्रेदं विचारयामः। व्यभिचाराभावविशिष्टसाध्यसामाना
धिकरण्यज्ञानहेतुतामते व्यभिचारप्रकारकत्वव्यभिचाराभाववाभावप्रकारकत्वभेदे
नद्विविधनिर्णयत्वनिवेशेन व्यभिचाराभाववत्ति व्यभिचाराभावप्रकारकमित्याका
रकाप्रामाण्यज्ञानव्यभिचारवत्ति व्यभिचाराभावप्रकारकमित्याकारकाप्रामाण्य
ज्ञानाभावयोरनुमितिजनकतावच्छेदककोटौ निवेशावशावश्यकत्वेन तयोर्विशेषण
विशेष्यभावे विनिगमनाविरहेण कारणताधिक्येन गौरवावतारदुर्वारैवं रावत एम १

न्यनेत्र व्यभिचरितत्वसाध्यसामानाधिकरण्ययोर्विशेषणविशेष्यभावविनिर्मिनाविष्य
भावेविनिगमनाविरहेण कारणताधिक्यानुव्यमिति वाच्यं नहि व्यभिचारज्ञानाभा
वविशिष्टसाध्यसामानाधिकरण्यज्ञानमनुमितिहेतुरितिब्रूमः नचैवं सतियेनोक्तानु
पपत्तिः स्यात् अपितु व्यभिचारज्ञानाभावसामानाधिकरण्यज्ञानमेव हेतुः स्यात् अत्र एकहेतुता
दृये नचैवं सति मैत्रमन्मतेऽभावेन लौमन्मतेऽभावेनलाघवस्यातिस्फुटत्वात् न च व्यभि
चारज्ञानाभकारणतामैत्रवन्मते लाघवान व्यकाशः भवन्मते तसिद्धविशेष्यविशेषणभा
वमयुक्तत्वद्वैकारणतावच्छेदकशरीरगौरवस्यमन्मते लाघवानेऽभावेन लाघवस्या
तिस्फुटत्वात् न च व्यभिचारज्ञानाभकारणतामते ज्ञानस्याव्याप्यवृत्तितयाव्य
भिचारज्ञानकालेपितदभावसत्त्वेनानुमित्यापत्तिरितिवाच्यं स्वसमानाधिकरणै
कालवत्त्वसंबंधावच्छिन्नप्रतियोगिताकज्ञानाभावस्यहेतुत्वात् अनेनसंबंधेनज्ञा

© Dharmartha Trust. Digitized by eGangotri

नादेर्व्याप्यवृत्तित्वस्यकेनाप्यनभ्युपगमादिति॰ अथ व्यभिचारज्ञानप्रतिबंधकता
११ मते हेतुतावच्छेदकभेदेन मतिवद्यप्रतिबंधकभावबाहुल्यापत्तिः व्यभिचाराभावधि
शिष्टसाध्यसामानाधिकरण्यज्ञानहेतुतामिति तेन हेतुतावच्छेदकविषयतानिवेश
॥ प्रयुक्तगौरवं हेतुतावच्छेदकविषयतामनिवेश्यैव तथा कार्यकारणभावकल्पना
न॰ न च निरूपितत्वादिति निर्वचनानुरोधेन हेतुतावच्छेदकविषयतायामवत्मतेपि निवे
श्य आवश्यक इति वाच्यं॰ हेतुतावच्छेदकविषयतामानवेशपनिरूपितत्वादिति निर्वच
नस्यागारस्य नवीनमतविचारे दूषितत्वादिति चेन्नैवं॰ हेतुतावच्छेदकविषयतामनिवे
श्य व्यभिचारज्ञानानुत्तरज्ञानप्रति व्यभिचारज्ञानाभावस्य हेतुत्वे घटपटादिप्रत्यक्षेम
तिव्यभिचारविषयकशाब्दबोधसामग्रीप्रतिबंधकतावच्छेदककोटौ व्यभिचारज्ञा राम
नरूपयोग्यताज्ञानानिवेशप्रयुक्तलाघवस्यानवकाशान्न चैवं सति तथाविषयो ११

© Dharmartha Trust. Digitized by eGangotri

ग्यताज्ञानाभावकालीनघटपटादिमत्त्वप्रत्यक्षेशाब्दबोधसामग्रीप्रतिबंधकतावच्छेदककोटि
मान्यभावस्यहेतुतायांव्यभिचारइतिवाच्यं· तथाविधयोग्यताज्ञानाघटितशाब्दबो
धसामग्र्यनुत्तरप्रत्यक्षेप्रतितथाविधयोग्यताज्ञानाघघटितशाब्दबोधसामग्र्यभाव
स्यहेतुत्वकल्पनेव्यभिचाराभावात्· नचैवंसतितथाविधयोग्यताज्ञानादिघटितशा
ब्दबोधसामग्रीकालेप्रत्यक्षापत्तिरितिवाच्यंघटपटादिमत्त्वप्रत्यक्षेप्रतियोग्यताज्ञानाभा
तथाविधयोग्यताघटितशाब्दबोधसामग्र्यभावान्यतरघटितसामग्र्याःप्रत्यक्षसामग्र्यानि
यामकत्वेनधूम्यापत्तेरभावात्· यदिचअव्यभिचरितसादृश्यसामानाधिकरण्यप्रका
रकज्ञानाव्यवहितोत्तरज्ञानेप्रतितथाविधज्ञानस्यहेतुत्वेघटादिमत्त्वप्रत्यक्षेप्रतिव्यभिचा
राभावविशिष्टसादृश्यसामानाधिकरण्याभावप्रकारकानुमितिसामग्रीप्रतिबंधकताव
च्छेदकतावच्छेदककोटौतथाविधसामानाधिकरण्यप्रकारस्तुभवत्स्वैवेयप्रकारक

© Dharmartha Trust. Digitized by eGangotri

१२ वाधाभागनिवेशप्रयुक्तलाघवस्यासत्वात्तथैव कार्यकारणभावः कल्प्यते
12 आपत्तिवारणप्रकारस्तु भवद्भिरेव दर्शितः इति अव्यभिचरितसाध्यसामानाधिक
रण्यज्ञानहेतुतामतेपि न गौरवावकाश इति विभाव्यतं न चापि विनिगमनाविरहात्
व्यभिचारज्ञानाभावादिहेतुतादुर्वारैवेत्यस्थितं अव्यभिचरितसाध्यसामानाधिकरण
यज्ञानविशिष्टज्ञानस्यैवानुमितिहेतुत्वमिति निरूपमभञ्जोक्तिः शं वसति अव्यभिचरि
तसाध्यसामानाधिकरण्यज्ञानस्यैव सर्वत्रानुमितिहेतुत्वमितिवादिनां दीधितिकार
णां कागतिरिति चेत् न तथानुभवस्यतिप्रमाणकत्वे विगतिरेव तेषामिति॰ यदपि व्य
तिरेके साध्यकानुमितिं प्रति साध्याभाववदवृत्तित्वविशिष्टप्रकारकज्ञानकारण
मिति तत्र तस्यैव व्याप्तिः केवलान्वयिसाध्यकानुमितिप्रति केवलान्वयित्वविशिष्ट गम
साध्यसामानाधिकरण्यविशिष्टज्ञानहेतुरिति तत्र सैव व्याप्तिः केवलान्वयि॰ चेव १२

© Dharmartha Trust. Digitized by eGangotri

तिमदन्यत्वं नाभावप्रतियोगित्वं वृत्त्योन्याभावप्रतियोगितानवच्छेदकत्वं वा अतो न के
वलान्वयिनि व्यभिचारस्त्वमदशायामनुमित्यापत्तिरिति मतं तदपि न· सर्वत्र वृत्ति
मदन्यताभावप्रतियोगिसादृश्यसामानाधिकरण्यविशिष्टज्ञानत्वस्य तथाविधान्योन्या
भावप्रतियोगितानवच्छेदकसादृश्यसामानाधिकरण्यविशिष्टज्ञानस्य हेतुत्वेनैव सर्वसा
मंजस्ये तथाविधकार्यकारणभावद्वयकल्पने गौरवात्· नच सादृश्यसाधनत्वयोरैक्याभा
वेन सादृश्यसाधनभेदे नानुमितिप्रमाणयोः कार्यकारणभावभेदावश्यकतया न गौरवा
वकाशः प्रत्युत लाघवमेव व्यतिरेकिसादृश्यकानुमितिप्रति तथाविधगुरुरूपेण हेतुत्वा
कल्पनेनेति वाच्यं व्यतिरेकिसादृश्ये केवलान्वयित्वभ्रमदशायामनुमित्युपपत्त्यर्थं तत्रा
प्युपदर्शितकेवलान्वयित्वविशिष्टसादृश्यसामानाधिकरण्यप्रकारकज्ञानहेतुत्वे
कल्पनीये व तिलाघवं साधनवदादौ कनिवेशेव कार्यकारणभावकल्पनात् व्यति
रेकिसादृश्यकस्थले कार्यकारणभावद्वयकल्पनापेक्षया न तथाविधककार्यकारणभा

© Dharmartha Trust. Digitized by eGangotri

वकसमानात्व्यतिरेकिसाध्यकस्थले कार्यसिद्धेर्यां नुगमकत्वादयं पाञ्चत्रोच्यते: प्र
१३ तियोग्यसमानाधिकरणयद्रूपावच्छिन्नसमानाधिकरणाभावप्रतियोगितानवच्छेदकं य
द्रूपं तदवच्छिन्नसामानाधिकरण्यविशिष्टयत्तद्रूपत्वद्धर्मावच्छिन्नपावत्तिरूपितातद्धर्माव
13 च्छिन्नत्वं निरूपव्याप्तिः इदमसमानाधिकरणाभावप्रतियोगितानवच्छेदकं वह्नित्वावच्छिन्नवह्नि
सामानाधिकरण्यविशिष्टवद्धूमत्वं व्याप्यधूमसत्वद्वह्निमानद्धूमादित्यादौ धूमे लक्षणसम
न्वयः। असद्धेतौ तु सादृशतावच्छेदकस्य हेतुसमानाधिकरणाभावप्रतियोगितावच्छेद
कत्वान्नातिव्याप्तिः नचद्दंडिमानदंडिसंयोगादित्यादावव्याप्तिः।सवैषमदंडनां
चालनीन्यायेन तत्तद्दंडिसंयोगाधिकरणवृत्तितत्तद्दंडविशिष्टाभावप्रतियोगिताव
च्छेदकत्वात् न च तत्तद्दंडविशिष्टाभावप्रतियोगितावच्छेदकत्वं तत्ताविशिष्टदंडत्वेन एम
लशुद्धदंडगतधावमुद्धदंडस्यतत्धाविषाभावप्रतियोगितानवच्छेदकत्वात्तेनोप १३

© Dharmartha Trust. Digitized by eGangotri

दर्शिताव्याप्तिरिति वाच्यं न हि तद्दंडे नास्तीति प्रतीतिः तन्नाविशिष्टे दंडेऽभावप्रतियो
गितावच्छेदकत्वमवगाहते प्रमाणाभावात् यत्र हि शुद्धविशेष्यमतिप्रसक्तं तत्रातिप्र
सक्तधर्मस्य प्रतियोगितावच्छेदकत्वानभ्युपगमात् विशेषणविशिष्टे प्रतियोगितावच्छे
दकत्वमुपेयते प्रकृते तु तन्नोपलक्षितदंडस्यानतिप्रसक्तत्वात् तदुपलक्षितत्वेन तद
भावप्रतियोगितावच्छेदकत्वमिति वस्तुतस्तु अवच्छेदकताया व्याप्यवृत्तित्वान
भ्युपगमेन तन्नाविशिष्टे दंडे तादृशाभावप्रतियोगितावच्छेदकत्वाभ्युपगमोऽसंभव
दुक्तिक एवं रावं वे सति यत्र प्रतियोगितावच्छेदकमतिप्रसक्तं तत्र का गतिरिति तु नाशंक
नीयः तत्र प्रतियोगितावच्छेदकमात्रवृत्तिकिंचिद्धर्मस्य प्रतियोगितावच्छेदकनिष्ठा
वच्छेदकतावच्छेदकत्वाभ्युपगमात् अतिप्रसक्तधर्मानिप्रतियोगितावच्छेदकस्य
स्यानतिप्रसक्ततन्निष्ठधर्मे तन्निष्ठावच्छेदकत्वमनभ्युपेत्य तस्य प्रतियोगिताव

© Dharmartha Trust. Digitized by eGangotri

छेदकत्वं नाभ्युपेयत इत्यर्थः ॥ न चैवं सति चक्रवर्त्तिलक्षणोऽवच्छेदकतापर्या
विवक्षणेन महानसीयवृत्त्यभावादाय वह्निमान्दरूमादित्यादावव्याप्तिवारणं
२५ दीधितिकृतामसंगतमेवेति वाच्यं । तावन्मात्रस्याभावात् ॥ तस्मात्द्रिमान्दण्डसंयो
14 गादित्यादावुपदर्शितरीत्याऽव्याप्तिदुरुद्धरैवेति चेन्नैवं । तादृशाख्यत्वेन त्वाऽऽप
संयोगित्वरूपपरंपरासंबंधेन दण्डत्वस्यैव साध्यतावच्छेदकत्वाभ्युपगमात् ॥ न चै
वं प्रतितत्राव्याप्तिः । दण्डिसंयोगाधिकरणीयपरंपरासंबंधेन दण्डत्वविशिष्टस्याभावा
नंगीकारान्न तद्धर्मावच्छिन्नेत्तत्सहद्धर्मावच्छिन्नप्रतियोगिताकाभावस्य विरोधा
त् ॥ नन्वेवं सति दण्डिमानित्याकारिकानुमित्यनुपपत्तिस्तत्र दण्ड्यानित्याकारीका
नुमित्यापत्तिश्चेति चेन्न । अन्यथाऽख्यातिपत्तेः यत्र दण्डनकीभूतज्ञाने सामानाधिकरण्यप
निरूपकतावच्छेदकत्वेन परंपरासंबंधेन दण्डत्वं तत्रान्वेषणाभास तेन तत्र दंडवानि राम २५

© Dharmartha Trust. Digitized by eGangotri

न्याकारिकानुमितिमभ्युपेत्य तनुव्याविधानुमितिप्रतिदंडिसंयोगाधिकरणवृत्तित्वपरंपरासंबंधावच्छिन्नप्रतियोगि
ताकाभावप्रतियोगितानवच्छेदकदंडत्वविशिष्टसमानाधिकरणत्वानयमितित्वान्नस्यादेतुत्वाभ्युपग
मात्. नाद्यः परंपरासंबंधेन तत्र जनकीभूतज्ञाने सामानाधिकरण्यप्रवेशकृतावच्छेदकत्वेन दंडविशेष
णतावच्छेदनदंडत्वं परंपरासंबंधेन भासते तत्र दंडिमानित्याकारिकानुमितित्वेपि तन्न व्याविधा
नुमितिप्रतिदंडिसंयोगाधिकरणवृत्तिपरंपरासंबंधावच्छिन्नप्रतियोगिताकाभावप्रतियोगितानवच्छेद
कदंडत्वविशिष्टदंडिसमानाधिकरणत्वानयमितित्वान्नस्यादेतुत्वाभ्युपगमेनाद्यदोषात्तानवकाले दं
डिमान्ह्रदस्यादित्याकारकानुमितित्वस्यानो बाधकाभावादिति. एतेन दंडत्वव्याप्यविषयप्रतियोगितानवच्छेदकत्व
स्यमवगाहमानत्वव्याविधानुमितित्वस्य तिन्नमितेषामितिपरंपरासंबंधेप्रतिबंधितेनैतस्मात्रापि संभवादिति पुन
दीधितिकारानुकारिपदार्शीलितः पंथाः वस्तुतस्तु साध्यसाधनमभेदेन व्याप्तिलक्षणास्य वृत्तिमित्यत
या दंडिसाध्यक दंडिसंयोगादिहेतुकस्थले दंडिसंयोगाधिकरणत्ववृत्त्यभावप्रतियोगितावच्छेदकता
नवच्छेदकदंडत्वावच्छिन्नविशिष्टसामानाधिकरण्यं व्याप्तिः सम्भुपगमेन न तत्र परंपरासंबंधेन दंडत्व

© Dharmartha Trust. Digitized by eGangotri

स्पसाधतविशिष्टद्रव्यत्वानंगीकारेऽपि न स्पतिर्नैयाततम्प्रमातुपपत्तिरिति साद् कपिसंयोगी एतद्वृक्षत्वादित्यादा
१५ वृक्षाभिवारणाय प्रतियोगिसमानाधिकरणेति· प्रतियोगिव्यधिकरणेत्यत्र निरुक्तविशिष्टत्वं सर्वे· अन्यथा पाक
15 पिसंयोगाभावस्यापि गुणत्वावच्छेदेन प्रतियोगिसमानाधिकरणत्वात् तस्मैष्यव्याप्तेदुर्वादित्वात्· यत्तु सं
योगी द्रव्यत्वादित्यादावव्याप्तिवारणाय प्रतियोगिसमानाधिकरणेति· तन्न· द्रव्ये संयोगाभावे प्रामाण्याभावा
त्· न च प्रत्यक्षप्रमाणेऽपि तत्· प्रतियोगिपदं विशेषणं दोषस्वत्वेन तत्र तदभावाप्रत्यक्षेण तदभावासंभवात्· अथ
योपदं धर्मव्याप्यधर्मावच्छिन्नप्रतियोगिताकयावदभाववान् सत् तद्धर्मावच्छिन्नाभाववानिति निष्पन्नम् तद्द्रव्ये संयोगत्व
व्याप्यं तन्त्संयोगत्वावच्छिन्नप्रतियोगिताकयावदभावस्य विद्यमानत्वात् संयोगत्वावच्छिन्नाभावसिद्धिः न वा
त्र कम्बुग्रीवादिमत्वव्याप्यतत्तद्घटत्वावच्छिन्नप्रतियोगिताकयावदभाववति भूतले कम्बुग्रीवादिमत्त्वावच्छिन्न
प्रतियोगिताकाभावाप्रसिद्ध्या तदभावस्य तेन व्यभिचार इति वाच्यम्· पदार्थैः भावप्रतियोगिभावे द्रव्यत्वविशेष
णात्· अत्राभावप्रतियोगितायां पदघटसंबंधावच्छिन्नत्वं प्रतियोगिविशेषणीयम्· अन्यथा तद्धर्मावच्छिन्नप्रतियोगिता
काभावे तत्र तत्संबंधावच्छिन्नप्रतियोगिताकाभावात् अलाभात्· न चैवं समनिष्ठनिविरहः· संयोगसंबंधाद्रूप न्या०
ाधिकरणसंबंधावच्छिन्नसंयोगत्वावच्छिन्नप्रतियोगिताकाभावमादाय प्रसिद्धसाधनात्· न चैवं सत्यपि हेतुः १५

३

स्वरूपासिद्धेः तथाविधयावद्वृत्तिगेनतासंयोगान्यसंयोगत्वावच्छिन्नप्रतियोगिताकाभावस्य द्रव्ये सत्त्वात् द्रव्ये संयोगत्वा
वच्छिन्नप्रतियोगिताकाभावानंगीकर्त्यिते तदभावस्याप्यनभ्युपगमादिति वा संख्याद्यधर्मेऽनेकवृत्ति च विशेष
णोपादानात्. न चैवं तद्विशेषणस्य स्वरूपासिद्धिमात्रवारकत्वेन वैयर्थ्यमिति वाच्यं स्वरूपेणाभावघटकत्वेन
वैयर्थ्याभावादिति. यावत्त्वं च तत्र व्यापकत्वं तथा च यो यत्संबंधावच्छिन्नाभावप्रतियोगितावच्छेदकीभूत
यद्धर्माव्याप्यानेकवृत्तीधर्मावच्छिन्नप्रतियोगिताकाभावव्यापकीभूताभावीयाधेयेन यत्संबंधावच्छिन्नप्रति
योगितावच्छेदकत्वाभावाश्रयः स तत्संबंधावच्छिन्नतद्धर्मावच्छिन्नप्रतियोगिताकाभावाश्रयत्वमुपदर्शि
तनियमनिष्कर्ष इति चेत्मैवं. एकावच्छेदेन यावत्संयोगविशेषाभावस्योपाधित्वात्. तथाहि. यत्र यत्र गु
णत्वे संयोगत्वावच्छिन्नाभावस्तत्रैकावच्छेदेन यावत्तत्संयोगाभाववृत्तिसाध्यव्यापकस्य तस्य द्रव्ये नाना
वच्छेदेन वर्त्तमानतया साधनाव्यापकत्वात्. यन्तु गुणोनेतत्संयोगाभावस्य व्याप्यवृत्तितया अवच्छेदकाभा
वेन तत्रैकावच्छिन्नयावत्तत्संयोगाभावस्यासत्त्वेन साध्यव्यापकत्वात् सोपाधित्वं. न चैकावच्छेदेनेत्यस्य
मेकावच्छेदकानवच्छिन्नार्थत्वात् अनुपपत्तिरिति वाच्यं. स्वस्वाश्रयावच्छिन्नत्वरूपसंयोगयतिमध्यावच्छेदतन

© Dharmartha Trust. Digitized by eGangotri

१६ द्रभाववति सैवं तदुपदर्शितसामान्यधर्मावच्छिन्नसाध्यव्यापककपिसंयोगत्वावच्छिन्नाभावस्याधिकरणे मूलावच्छेदेन वर्त-
16 मानस्य मूलावच्छिन्ने तेन तत्कपिसंयोगविशेषाभावस्यानेकावच्छिन्नत्वेनानेकावच्छेदकानवच्छिन्नतेन तत्क-
पिसंयोगविशेषाभावासत्त्वेन तथाविधोपाधेः साध्याव्यापकत्वस्यातथ्यापि दर्शितत्वादिति । तदसत् । अवच्छे-
द्यत्वैकावच्छेद्यत्वाभावोभयाभावविशिष्टयावद्विशेषाभाववत्त्वस्योपाधित्वे दोषाभावादिति । तस्मादनुमा-
नासंभवेन द्रव्ये संयोगो नास्तीति शाब्दस्यापि तु तथा शब्दप्रमाणस्यासंभवेन द्रव्ये संयोगसामान्याभावस्या-
सिद्धौ तथानोपदर्शितस्थले प्रतियोगिसामानाधिकरण्यस्याव्याप्तिः संभवतीति जीर्णाः । तदसत् । अवय-
विनि उत्पत्तिकालावच्छेदेनानित्ये मूलावच्छेदेन संयोगसामान्याभावस्य विद्यमानतया तत्रापि तथा वृत्ति-
संभवात् । न च उत्पत्तिकालावच्छेदेन तत्र संयोगसामान्याभावे मानाभावः एकत्ववति एकत्वोसंदवारणाप
जन्यैकत्वप्रतियोग्यभावत्वेन संयोगत्वावच्छिन्नाभावत्वेन वा विनिगमनाविरहेण हेतुताकल्पनस्यावश्य-
कतया तथाविधकार्यकारणभावद्वयानुकूलतर्कसहकृतस्य द्रव्ये संयोगसामान्याभाववत् संयोगविशे- राम०
षाभावादित्यनुमानस्यैव द्रव्ये संयोगसामान्याभावसिद्धौ प्रमाणत्वात् । न च उपदर्शितोपाधिसत्त्वेन नैतादृशा- १६

© Dharmartha Trust. Digitized by eGangotri

नुमानानुपपत्तेरिति वाच्यं उपदर्शितानुकूलतर्केणाहेतोः साध्यव्याप्यत्वे साध्यव्याप्यव्यापकत्वे निश्चिते साध्य
व्यापकत्वेन तद्व्याविधविशेषाभाववस्योपाधित्वासंभवात् ॥ न चैवमपि निश्चितत्वे मानाभाव इति वा
च्यं ॥ प्रलयावच्छेदेन गगनादौ संयोगो नास्तीति व्यवहारस्यैव तत्र मानत्वात् ॥ अथैवं सत्युत्पत्तिकाला
वच्छेदेन घटादौ गुणसामान्याभावस्यापि सिद्धेर्गुणसामान्याभाववान् घटत्वादित्यादावपि प्रतियोग्य
सामानाधिकरण्याद्दलव्याप्तिः कृत्स्नो व्यापत्तीति चेत्सत्यं कृत्स्नाभावतमायुक्तत्वात्तत्रापि तद्व्यावृत्ति
त्वेन सामान्याभावादिनियेन गुणरूपवृत्तिभिन्नवेहुताहानो न तथा वृत्तिमत्तीति वृत्तान्ते संयोगादिसंबंधेन वृत्त्यादे
रप्यव्याप्यवृत्तितया वह्निमान् धूमादित्यादावपि प्रतियोग्यसामानाधिकरण्याव्यावृत्तेः संबंधवतीत्येव
रेति ॥ तेषु नवृत्तिरव्याप्यवृत्तित्वे वृत्तिमतो व्याप्यवृत्तित्वाभिनिवृत्तिः मुक्तावलीपरिवृद्धिर्न संपदः ॥ केनाप्य
बाधादिति ॥ साध्यसाधनभेदेनाभिलक्षणस्य भिन्नतया व्याप्यवृत्तिसाध्यके प्रतियोग्यसामानाधि
करण्यविशेषणेनोपादेयमेव तद्व्यावृत्तिसंयोगाभाववान् गुणत्वादित्यादावव्याप्यवृत्तिसाध्यकेऽपि तथा ॥ अ
त एव नीलादिरूपे च सर्वथैवाव्याप्यवृत्तिसाध्यकेन हि तत्र सर्वथापदस्य सार्थकत्वात् व्याप्यवृत्तिसाध्यके प्रपित

© Dharmartha Trust. Digitized by eGangotri

१७
17

त्रेद्यं॰ अन्यथा व्याप्यवृत्तिसाध्यकेऽतत्तद्वच्छेदकविचित्रेऽव्यापमितिभावो व्यर्थविशेषणं यंति॰ न चित्तत्र गुरु॰ । व्याप्यवृत्तिसाध्य
केऽपि प्रतियोगव्यधिकरणपदनिवेशस्यावश्यकत्वात्॰ तथा हि यदि व्याप्यवृत्तिसाध्यके न प्रतियोगीवै
य्यधिकरणपनिवेशात्तदात्तज्जावान्द्रव्यत्वादित्यादावव्याप्तिः । द्रव्यत्वाधिकरणे घटे कालिकसंबंधेन तत्
त्ताभावस्य सत्वात्तन्न च तत्र हेत्वधिकरणवृत्तित्वमभावीयविशेषणविशेषणताविशेषसंबंधेन वक्त
व्यमिति वाच्यं॰ तथा सति द्रव्यत्वाद्यभाववान् प्रमेयत्वादित्याद्यभावसाध्यकस्थलेऽतिव्याप्तेः । द्रव्य
त्वाभावाभावस्य द्रव्यत्वस्याभावीयविशेषणविशेषणताविशेषसंबंधेनावृत्तितया तेन संबंधेन
हेत्वधिकरणवृत्त्यभावीयप्रतियोगितायाः नवच्छेदकत्वस्य साध्यतावच्छेदके सत्वात्॰ न च
साध्याभेदेन व्याप्तिलक्षणस्य विभिन्नतया भावसाध्यकस्थले समवायादिसंबंधेनैव हेत्वधिकरण
वृत्तित्वस्याभिधानान्नोक्तदोष इति वाच्यं । तथा सत्यव्याप्यवृत्तिसाध्यकेऽपि निरवच्छिन्नविशेषणता
विशेषसंबंधेन हेत्वधिकरणवृत्तित्वस्याभिधाने नैवमुक्तसर्वसामंजस्ये प्रतियोगव्यधिकरणपद रम०
निवेशस्यैव व्यर्थतापत्तेः॰ न च निरवच्छिन्नविशेषणताविशेषे प्रमाणाभाव इति वाच्यं॰ तदस्वीकारे द्रव्या १७

© Dharmartha Trust. Digitized by eGangotri

संयोगाभावस्याहेत्वधिकरणवृत्तित्वाद्येसंबंधविवक्षानास्तीत्येतत्कल्पद्वयेप्रतियोग्यसामानाधिक
रण्यनिवेशानिवेशविचारस्त्ववश्यकर्तव्यः । एवं च अव्याप्यवृत्तिसाध्यकेस्थलेपि प्रत्युक्तरीत्याऽ
व्यभिचारवारणाय प्रतियोग्यसामानाधिकरण्यनिवेशआवश्यक इति । अस्तु वा हेत्वधिकरणवृत्तित्वा
घेसंबंधविवक्षा न व्यापिकालिकसंबंधावच्छिन्नप्रतियोगिताकोयो आकाशाभावस्तस्याऽवृत्तस्य
विशेषणताविशेषेणसाध्यतायां आत्मत्वादिरूपव्याप्यवृत्तिहेतौप्रतियोग्यसामानाधिकरण्य
घटितलक्षणस्यावश्यकतया अव्याप्यवृत्तिसाध्यकेपि क्वचित्प्रतियोग्यसामानाधिकरण्यनिवे
शआवश्यकः । अन्यथा तथाविधाकाशाभावरूपसाध्याभावस्याकाशाभावस्यविशेषणताविशे
षसंबंधेनहेत्वधिकरणे आत्मनि विद्यमानतयातेनाव्याप्तेः प्रकारांतरेणवारणासंभवात् । न च तत्र
साध्यवज्जायहवृत्तिविशेषितानियामकसंबंधेनहेत्वधिकरणवृत्तित्वं वाच्यं । न प्यासत्तापितादृशेनकालि
कसंबंधेनहेत्वधिकरणे आत्मनि निःसेवृत्तित्वाप्रसिद्धाऽव्याप्तेर्दुर्वारत्वादिति । सर्वकल्पएव व्याप्य
वृत्तिसाध्यकेप्रतियोग्यसामानाधिकरण्यनिवेशस्यावश्यकत्वान्यान्नोमादेयं च सर्वथैव अव्याप्यवृत्ति

© Dharmartha Trust. Digitized by eGangotri

साध्यवैप्रतियोग्यसामानाधिकरण्यमित्यसंगतमेवेति चेन्नैव· आव्याप्यवृत्तिसाध्यकेऽस्यासत्ताभावाप्रति
१८ योगिसाध्यकेऽसंप्रविकरणो नैक्कैलान्वयिसाध्यकेप्रतियोग्यसामानाधिकरण्यमनुपादेयमित्युक्तत्वात्·
18 तत्र साध्याभावाप्रसिद्ध्या साध्याभावे हेत्वधिकरणावृत्तित्वासंभवेन तदुद्दाने· ध्यामेसत्वकाशादित्वस्तं यं
प्यवाद्दल्लेन· प्रतियोग्यसामानाधिकरण्यपदलेप्रतियोगंवप्रतियोगितावच्छेदकावच्छिन्नत्वमवश्यं नि
वेशनीयं· अन्यथा मूर्त्तत्वमनेर्ज्जत्वोभयवान् मूर्त्तत्वादित्यादाववतिव्याप्तेः। न चोभयत्वं एकविशिष्टापरत्वंवि
शिष्टं च केवलादन्यत् तथा च विशिष्टाभावरूपोभयाभावप्रतियोगिनो विशिष्टस्य प्रनस्याविद्यमान
तयान तथाविधविशिष्टाभावरूपोभयाभावेप्रतियोग्यसामानाधिकरण्यसंभवेनोक्तानुपपत्तेरभा
वादिति वाच्यो। वैशिष्ट्यविरहे पि घटत्वपटत्वादावुभयत्वप्रतीतेरुभयत्वस्यैकपिशिष्टापरत्वरूपत्वा
संभवेनोक्तातिव्याप्तेर्वारणासंभवात् न च विरुद्धघटत्वपटत्वादावुभयत्वस्य विशिष्टरूपत्वासंभवे
पि मूर्त्तत्वमनेर्ज्जत्वादावुभयत्वस्य विशिष्टरूपत्वे बाधकाभाव इति वाच्यं। तत्रापि विरुद्धत्वभ्रमद राम
शायां उभयत्वप्रतीत्या तथावत्कुमपारम्न्यात्· अत एव उभयत्वं न विशिष्टत्वादननिर्दिक्तनवाने १८

© Dharmartha Trust. Digitized by eGangotri

स्वावच्छिन्नाभाववत्त्वस्वावच्छिन्नाभावात् वैशिष्ट्यविरहेऽपि घटत्वपटत्वयोः उभयत्वस्य उभयत्वेन तदभावस्य सत्त्वात् सिद्धत्वादि
युक्तं वनोदीधितिकृतोऽपि तथैवाभिमताः पंचरत्नादि इति । ननु दीधितिग्रन्थे उभयत्वावच्छिन्नाभावस्य विशिष्टाभावभिन्नत्व
कथनमनुपयुक्तं प्रकृते तत्पर्यायेऽपि प्रतियोगितावच्छेदकावच्छिन्नत्वनिवेशस्यावश्यकत्वात् । अत्र यथा तथा विधो
भयाभावस्य मन्तत्वस्वरूपप्रतियोगिसामानाधिकरण्येनोपदर्शितस्य लेऽशितव्याप्तिवारणासंभवादिति चेन्न
उभयाभावस्य विशिष्टाभावातिरिक्तत्वकल्पनस्य प्रासंगिकत्वेन प्रकृतानुपयुक्तत्वेऽपि क्षतिविरहात् । अथ
वाद्दत्तनीलघटस्य लोपं तत्किंचित्प्रतियोग्यसामानाधिकरण्यनिवेशितमिति मिश्राभिप्रायेणोभयाभावस्य विशिष्टान्त्रा
वातिरिक्तत्वकल्पने अन्यथा विशिष्टरूपपत्किंचित्प्रतियोगिनमादाय उभयाभावस्यापि प्रतियोग्यसामाना
धिकरण्यसंभवे तत्र प्रतियोगितावच्छेदकावच्छिन्नत्वनिवेशनस्यावश्यकत्वात् । न च यत्किंचित्प्रतियोगिसामाना
धिकरण्यसंभवे तत्र प्रतियोगितावच्छेदकावच्छिन्नत्वनिवेशनस्यावश्यकत्वात् । न च यत्किंचित्प्रतियोगिसामा
नाधिकरण्यनिवेशेऽपि संयोगी एतद्वृक्षत्वादित्यादावव्याप्तिरिति वाच्यं । अग्रे तद्दोषस्य दीधितिकृद्भिरेवान्यथो
पपन्नभावादिति । यत्तु तत्र प्रतियोगितावच्छेदकावच्छिन्नत्वानिवेशे तत्पाकर्मा न तु विशिष्टसत्त्वावान्त्ता

© Dharmartha Trust. Digitized by eGangotri

१९ तेऽशिवाद्यवृत्तित्वात्सिद्धिरिति । तत्र समवायसंबंधावच्छिन्नविशिष्टनिरूपितसाध्यताकजातिरूपहेतोः सद्धेतुतया नव्या
प्तिर्व्याप्त्यन्वयकारणात् । विलक्षणाधिकरणतासंबंधावच्छिन्नविशिष्टनिष्ठसाध्यताकजातिरूपहेतौ नातिव्या
19 प्तिसंभवना पि तत्र विशिष्टाभावस्यापि साध्यतावच्छेदकसंबंधेन प्रतियोगिसमानाधिकरणतया लक्षणघ
टकत्वादिति । ननु लक्षणे प्रतियोगिसामानाधिकरण्यनिवेशे कपिसंयोगी सत्त्वादित्यादावव्याप्तिः । प्र
तियोगिसमानाधिकरणकपिसंयोगाभावे प्रतियोगिसामानाधिकरण्यविरहेणात्र स्वभावस्य लक्षणाघट
कत्वात् । न च सामानाधिकरण्यस्यांश्यावृत्तित्वांगीकारे गुणाद्यवच्छेदेन तत्र प्रतियोगिसामानाधि
करण्यसंभवात्तात्रापत्तिरिति वाच्यं । संयोगाभावगुणे न संयोगसामानाधिकरण्यमित्यादिप्रतीतेर्गु
णे संयोगाभावनिष्ठसंयोगसामानाधिकरण्यावच्छेदकत्वाभावमात्रविषयकत्वेन तत्र तत्त्वे प्रमा
णाभावात् । न च बाधकप्रतीतिसत्त्वादिति चेन्न । हेत्वधिकरणे प्रतियोगिवैयधिकरण्यस्य लक्षणे नि
वेशात् । न च प्रतियोगिव्यधिकरणहेत्वधिकरणवृत्तित्वं न चैवं लक्षणे हेतुसामानाधिकरण्यनिवेशो
व्यर्थ इति वाच्यं रूपत्वात् । तथा च प्रतियोगिव्यधिकरणहेत्वधिकरणावृत्त्यभावे तदभावो नार्थनिष्कर्षः एम०
प्रतियोगिव्यधिकरणवृत्तित्वं चात्र न यत्किंचित्प्रतियोग्यधिकरणावृत्तित्वं कपिसंयोगी एतद्वृक्षत्वादि १९

© Dharmartha Trust. Digitized by eGangotri

साध्यवत्त्वापत्तेः नापि प्रतियोगिसामान्यानधिकरणत्वं · वह्न्यभाववत्त्वानं द्रव्यत्वाभावादिसाध्यके सर्वेषामेवा
भावानां एकैकक्षणवृत्तित्वविशिष्टस्वाभावरूपप्रतियोगिसमानाधिकरणत्वेन प्रतियोग्यधिकर
णाभावाप्रसिद्धाः व्याप्त्यापत्तेः यत्र · इदं द्रव्यं विवक्षायां द्रव्यत्वाभाववान् सत्त्वादित्यादावतिव्याप्तिः तत्र
द्रव्यत्वरूपाभावप्रतियोगिनो नित्यवृत्तित्वविशिष्टद्रव्यत्वाभाववज्जमत्वविशिष्टद्रव्यत्वाभावान्तर
स्याहेत्वधिकरणेसत्त्वेन तस्य प्रतियोगिव्यधिकरणत्वविरहादिति लक्षणत् · सर्वेषामेवाभावानां एकैकक्ष
णवृत्तित्वविशिष्टस्वाभावरूपप्रतियोगिसमानाधिकरणत्वेन प्रतियोगिअधिकरणाभावाप्रसिद्ध्याऽ
तिव्याप्त्यनवकाशात् · नापि यत्किंचित्प्रतियोगितावच्छेदकावच्छिन्नसामान्यानधिकरणत्वं कपिसं
योगाभाववान् आत्मत्वात् पृथिवीत्वाद्वा साध्यवत्त्वापत्तेः · तत्र गुणत्वसकसंयोगरूपसाध्याभावस्य प
त्किंचित्प्रतियोगितावच्छेदकगुणत्वसामान्याभाववत्त्वावच्छिन्नानधिकरणत्वस्य हेतुत्वधिकरणेस
त्वेन प्रतियोगिव्यधिकरणसंभवात् · किंतु यादृशप्रतियोगितावच्छेदकावच्छिन्नानधिकरणत्वं हे
तुमत्तन्निष्ठाभावीयतादृशप्रतियोगिनेतिप्रतियोगितांशीनिष्कर्षः · तत्र च नोक्तानुपपत्तिलेशोऽपि

© Dharmartha Trust. Digitized by eGangotri

तिक्षेपां. अत्र च प्रयोग्यधिधिकरणता साध्यतावच्छेदकसंबंधावच्छिन्ना वोध्या. अन्यथा जातिमात्रमेय
२० त्वाद्दित्यादौ हेत्वधिकरणे समवायादौ ए का पर्यवृत्तित्वसंबंधेन जात्यभावप्रतियोगिजातिमत्त्वात्तस्य प्र
तियोगिव्यधिकरणत्वासंभवेनातिव्याप्तेः न च प्रतियोगिव्यधिकरणभावाप्रसिद्ध्या ज्ञानानित्याति:
20 प्रर्वक्षणवृत्तित्वविशिष्टजात्यभावस्यैव तादृशस्य प्रसिद्धत्वात्. यत्तु: साध्यतावच्छेदकसंबंधेन प्रतियोगि
त्वंप्रतियोगितावच्छेदकसंबंधेन च प्रतियोग्यधिकरणत्वमिति तन्नोक्तदोष इति. तदसत्. उभयत्र संबंधा
विवक्षायां गौरवात्. न च साध्यतावच्छेदकसंबंधेन प्रतियोग्यधिकरणत्वानिवेशेन नानासंबंधावच्छि
न्नानाप्रतियोगितानां तत्र प्रसक्तत्वेन लक्षणे निवेशे गौरवेणादुर्हृपत्वेन च तदपेक्षयाएतत्. कृत्स्न
स्यैव समीचीनत्वामिति वाच्यं स्वावच्छेदकावच्छिन्नाधिकरणानुयोगिकत्वस्य निरूपकीभूताभावप्रति
रूपितत्वोभयसंबंधावच्छिन्नप्रतियोगिताविशिष्टाभावाधारहेत्वधिकरणनिष्ठाधिकरणतानतिरूप
कीभूताभावप्रतियोगितानवच्छेदकेत्यादिना लक्षणपरिष्कारेण तत्र प्रसक्तत्वेन प्रतियोगितानां एम०
मनिवेशेनानुपपत्त्यभावात्. न चैवं स्वरूपितत्वाप्रसिद्धिः तादात्म्यसंबंधेन वह्न्यादीनां साध्यत्वे तत्र दूषा १०

© Dharmartha Trust. Digitized by eGangotri

दिहेतौ हेत्वधिकरणवृत्त्यभावीयःप्रतियोगिनः साध्यतावच्छेदकतादात्म्यसंबंधेनासंबंधिनोऽप्रसिद्धेः तथापि
धूमतादात्म्यस्य वह्नित्वादिरूपस्य घटपटादेरधिकरणसंबंधत्वादिति वाच्यं। तादात्म्यस्यातिरिक्तत्वाभ्यु
पगमात्. अनतिरिक्तत्वाभ्युपगमे च वह्नित्ववह्नित्वप्रकारकप्रमाविशेष्यत्वादिकमादायाप्रसिद्धिनिगमना
विरहेणानेनतस्यातन्नादात्म्यत्वकस्य नैगौरवात् तादात्म्यसंबंधेनातिरिक्तपदार्थाप्रसिद्धेः अभावमात्रस्याति
रिक्तत्वविलोपप्रसंगात्. न च व्याप्यवृत्तिसाध्यकेप्रतियोगिवैय्यधिकरण्यानिवेशात्तादात्म्यसंबं
धावच्छिन्नसाध्यकस्थले तत्प्रतियोग्यसंबंधित्वनिवेशेऽनिरर्थक इति वाच्यं। उपदर्शितरीत्या केवला
न्वयिसाध्यकातिरिक्तस्थले सर्वत्र प्रतियोगिवैय्यधिकरण्यनिवेशस्यावश्यकत्वात्. एवं हेत्वधिक
रणत्वमपि हेतुसंबंधित्वेवोध्यं अन्यथा तादात्म्यसंबंधावच्छिन्ने हेतुतास्थलेऽव्याप्तेः। एवं साध्यसामा
नाधिकरण्यमपि साध्यसंबंधिसंबंधित्वं स्वेपेतात तत्तादात्म्यसंबंधेन साध्यतायां हेतुतायां वाव्याप्ता
प्तिः। ननु वृत्तितानियामकसंबंधस्यैव व्यापकतावच्छेदकत्वनियमेन तादात्म्यसंबंधावच्छिन्नव्याप
कताया अलसंबंधावच्छिन्नव्याप्यतयाश्चाभावेन तद्दृष्टान्तो व्यर्थ इति लक्ष्यतो संबंधित्वनिवेशोऽव्यर्थ इ

© Dharmartha Trust. Digitized by eGangotri

२१

21

तिवाच्यं· तथाविधधूमनिरूपितप्रमाणाभावात्· अत एव तादात्म्यसंबंधेन वृक्षस्य शिंशपापत्वोपाधित्वमिति तत्रान्य
संगच्छते। अत एव द्वेषितिकारोपि अत एव गोत्वत्वाग्रहदशायां च सास्नादिः सा गोत्वमिति तादात्म्येन गो
व्यापकत्वं यहे तादात्म्येन गोः तादात्म्ये गोनुमितिकाल्पवृत्तात्मादिना निरुक्तश्चात्। सिद्धमिति· नन्विदमयुक्तं
तथाहि हेतुसमानाधिकरणाभावप्रतियोगितानवच्छेदकत्वोपेतधर्मितावच्छेदकव्याप्तिज्ञानस्यानुमि
तिहेतुः तथा सति हेत्वधिकरणावृत्त्यभावप्रतियोगितावच्छेदकसाध्यतावच्छेदकमपीति व्यभिचारज्ञानकालेप्य
नुमित्यापत्तेः। किंतु तदंशे पक्षधर्मितावच्छेदककत्वधाविधवृत्तानमेव तथा तथा च गोत्वे सास्नाधिकरणवृत्त्यभा
वप्रतियोगितानवच्छेदकविधया गोत्वत्वभानानुरोधेन गोत्वत्वतानवच्छिन्नसंयोगिकापत्तया गोत्वत्वाग्र
ग्रहदशायामिव्याप्तिज्ञानसंगतेरपि चेद्गोत्वत्वाग्रहदशायामिनसंगोः वलेन गोत्वत्वाग्रहदशा
यामितरूपाव्रत· तथा च पक्षगोत्वत्वत्वस्योपाधित्वितिनालिन्त गोत्वत्वत्वंधर्मितावच्छेदकीकृत्य तथाविधप्र
तियोगितानवच्छेदकत्वतानासंभवेन गोत्वसाध्यकानुमितेः संभवित पातरः ननु भवतु सिद्धरूपानुमितेः एला एल०
यप्रसंगादिति तादात्म्यसंबंधेन व्यापकत्वस्वीकारे तथाविधव्यतिरेकव्याप्तिज्ञानादनुमित्युपपत्तावपि तो २१

रात्म्यसंबंधावच्छिन्नव्याप्तिस्वीकारेप्याकाशपक्षकहेतौ नैरर्थक्यनिष्कर्षः ॥ अथ याग्रे वक्ष्यमाणप्रतियोगिताव
च्छिन्नाभावाघटितव्याप्तिलक्षणाभिप्रायेणैवायं ग्रन्थः । तत्र तथाविधव्याप्तिज्ञाने कालेगोत्वत्वज्ञानस्या
नावश्यकत्वात् । स्वरूपतो गोत्वं विधेयतावच्छेदकीकृत्यानुमितिप्रतिस्वरूपतो गोत्वावच्छिन्नत्वाद्यघटितोभयाभा
वज्ञानस्यैव हेतुत्वादिति मलमतिप्रायविलक्षणः । अपरेतु गोत्वत्वाद्याग्रहदशायामपि गोः स्ति अतीत्यंच यः । पर
गोत्वत्वमनुमितौ न भासते तेनदापि तत्र गोमस्तीनेत्यस्यार्थः । स्वरूपतो गोत्वादिप्रकारिका या या चानुमितिर्भवतीति
यावत् । तादात्म्येन व्यापकतानुपगमे गोत्वस्यैव साध्यत्वादिलिंगकानुमितौ भानस्योपगंतव्यतया विधेयतापरश्चा
वच्छिन्नत्वनियमेन स्वरूपतो गोत्वप्रकारकानुमितेरनुभवसिद्धत्वाच्चानुपपत्तिरितु पंथमसंगतिरिति वदंति
अथ महाकालो घटवान्कालपरिमाणादित्यादावव्याप्तिः । अत्र साध्यतावच्छेदकसंबंधेन प्रतियोगिसंबं
धियद्रूपावच्छिन्नाधिकरणेन वृत्तिभावाप्रसिद्धेः । न च गगनाद्यभाव एव तथाप्रवृत्ते गगनादेरभावस्य प्रतियोगि
नोगगनादेः कालिकसंबंधेन संबंधित्वाप्रसिद्ध्यात तथात्वानुपपन्नत्वात् । परंतु महाकालान्यत्वविशिष्टघ
टाभावस्यैव तत्र तथात्वान्नाव्याप्तिः । न च महाकालस्य जगदाधारत्वेन महाकालान्यत्वविशिष्टघटस्या
पि तत्र सत्त्वात्तथैवमिति वाच्यं । समानाधिकरणसंबंधप्रवेशविशेषणविशेषणविशेष्यसंबंधाभ्यां विशेषणवि

© Dharmartha Trust. Digitized by eGangotri

११ शेष्यपेरधिकरणत्वावच्छिन्नविशिष्टाधिकरणत्वाभ्युपगमेनैदैशिकविशेषणताविशेषसंबंधघटितसामा
२२ नाधिकरण्यसंबंधेन महाकालाभावत्वविशिष्टस्य घटस्य तथात्वकुमशक्यत्वात्· अन्यथाग्रेणकर्मत्वत्ववि
शिष्टसत्तायामपि ग्रहणे दोषप्रसंगात् न चैवं महाकालस्य जगदाधारत्वप्रवादो भज्येतेति वाच्यं अनवच्छिन्ना
ग्राधन्त्रिधेनतत्रतगस्ताधारत्वस्य संकोचावश्यकत्वात्· न च तथा महाकालीयविशेषणताविशेषसंबं
धेन महाकालाभावत्वविशिष्टघटाधिकरणत्वस्याप्रसिद्धात् तत्र प्रतियोगिव्यधिकरणस्येहे त्वधिकरणत्वस
भावस्याप्रसिद्धेरितिवाच्यं· स्वेष्टकालसाधारणकालिकविशेषणतातिरिक्तमहाकालीयविशेषणता
विशेषे प्रमाणाभावेन तथात्वकुमशक्यत्वादिति· तदसत्· सूक्ष्मानालोचनात्· तथाहि· यत्र विशिष्टं
नसाध्यं तत्र प्रतियोगिग्रहे प्रतियोगितावच्छेदकावच्छिन्नेत्वमानिवेश्य प्रतियोग्यसंबंधित्वं निवेश्य ल
क्षणकरणीयं साध्यासाधनभेदेन व्याप्तिभेदात् तथा च प्रकृतलक्ष्ये महाकालाभावत्वविशिष्टघटाभावो येन
प्रतियोगिव्यधिकरणः तदभावप्रतियोगिनो घटस्य महाकाले विद्यमानत्वात् तस्मात् कालिकविशेषणता प्र०
विशेषणसंबंधेन घटस्य साध्यता यो तद्रूपादिहेतावव्याप्तिः तत्रातेन संबंधेन प्रतियोग्यनधिकरणं यद्रूपत्व ११

© Dharmartha Trust. Digitized by eGangotri

धिकरणांतर्भूतस्याभावस्याप्रसिद्धेरिति चेन्नैवं। स्वाधारतावच्छेदकसंबंधेन यत्स्वावच्छेदकावच्छिन्नाधिकरणांत
र्भूतप्रतियोगिकत्वस्वनिरूपकीभूताभावनिरूपितत्वोभयसंबंधेन प्रतियोगिताविशिष्टान्यापारेत्वधिकरण
वृत्त्यधिकरणतानतिरिक्तरूपकाभावस्य तथाविधाभावाभावाप्रसिद्धेः स्वपर्यालोचनेन निरुक्तव्याप्ते
रसंभवप्रसंगात्। न चाहि गगनाभावीयप्रतियोगितायास्तथाविधोभयसंबंधस्य व्यधिकरणत्वेन गगना
भावानिरूपितत्वेऽप्यधिकरणनिष्ठाधिकरणतायास्तित्त्वसंबंधेन प्रतियोगिताविशिष्टं यत्तदन्यत्वस्य भ
यात्। एवमन्यत्रापीति। पुनरपि नवीनपरिष्कृतिं लिखति। पंच्याः। इत्थं तिककरणे तु साध्यतावच्छेदकसंबंधसामा
न्याद्दशप्रतियोगितावच्छेदकविशिष्टप्रतियोगित्वहेत्वधिकरणीभूतयत्किंचित्पदार्थानुयोगिक
त्वोभयाभाववत्तादृशप्रतियोगितानवच्छेदकमित्यवच्छेदकांतार्थनिष्कर्षः। एवं चोपदर्शितस्थले ग
गननिष्ठप्रतियोगिनैव तादृशीमूलमतिना व्याप्तिः। अन्यत्र घटसंयोगो वह्निनिष्ठप्रतियोगितावच्छेदक
विशिष्टप्रतियोगिकत्वघटितोभयाभाववत्त्वाद्वह्निमान् धूमादित्यादावव्याप्तिवारणाय साध्यताव
च्छेदकसंबंधसामान्यानिवेशेति। पः। धूमवान् वह्नेरित्यादौ धूमसंयोगे तथाविधोभयाभाववत्त्वादिति

२३ व्याप्तिवारणाय पदम् किं च क्रिनिवेशस्यानन्यथावाननुयोगिकत्वांतनिवेशोपि चैत्रान्यत्वविशेषेत दंडवान्गणेतद्
23 उरादित्यादावतिव्याप्तिवारणाय पादशाप्रतियोगितावच्छेदकविशिष्टेति । नचैवमपि वह्निमान् धूमादित्यादा
वव्याप्तिः अयोगोलकसंयोगनिष्ठवह्निप्रतियोगितावच्छेदकविशिष्टप्रतियोगिकत्वघटितोक्तोभया
भावस्य साध्यतावच्छेदकसंबंधसामान्येन वह्निमन्नवह्निनिष्ठप्रतियोगिताया अविनाद्दश्यत्वादिति वाच्यं
तथाविधप्रतियोगिकत्वसामान्यस्याविवक्षितत्वादिति । एवं अनुयोगिकत्वाभावेप्यसत्यानुयोगिकत्वसा
मान्याभावे समर्थः । नो तो वह्निमान् धूमादित्यादौ वाह्नसंयोगे घटादिनिष्ठतथाविधानुयोगिकत्वमादा
य वह्निनिष्ठप्रतियोगितावच्छेदकविशिष्टप्रतियोगिकत्वघटितोभयाभावसत्त्वेपि नातिव्याप्तिः । तथा
विधानुयोगिकत्वं च तथाविधानुयोगितानिरूपकत्वं तच्चाधिकरणतानिरूपकत्वापेक्षया भिन्नस्वरू
पसंबंधविशेषः । नातो धूमसंयोगादेः कालिकसंबंधेनायोगोलकादेः सत्त्वेपि धूमवान् वह्नेरित्यादाव
तिव्याप्तिः । तथाविधानुयोगितानिरूपकत्वस्य धूमसंयोगे निरूपितकालिकसंबंधएवाप्रसिद्धत्वात् । ए राम॰
वं प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिकत्वमपि प्रतियोगिकत्वमपि प्रतियोगितावच्छेदकावच्छि २३

© Dharmartha Trust. Digitized by eGangotri

त्वनिरूपकत्वं किंत्वं वोध्यमित्याहुः। तदसत्‌। इदं सर्वं वह्निव्याप्तान्त्वादित्वाद्यवमात्मेः। साध्यतावच्छेदकसंबंध
विषयतापांगतन्त्रप्रतियोगिकत्वसत्त्वेन तथाविधोभयाभावाप्रसिद्धेः। न च निरुक्तान्यत्वविशिष्टसत्त्व
त्वावच्छिन्नप्रतियोगिकत्वघटितोऽत्रोभयाभावस्तत्र सत्त्वान्नोपपद्यते निरीक्ष्यताऽव्याप्तिरिति वाच्यं। विशि
ष्टधर्मानवच्छिन्नसाध्यताकस्थलीयव्याप्तिलक्षणे प्रतियोगितावच्छेदकवैशिष्ट्याघटितप्रतियोगिवै
यधिकरणनिवेशाभिप्रायेणैतल्लक्षणाघटनात्‌। अन्यथापि वीजस्य प्रतियोगिवैयधिकरण्यलक्ष
णस्यैव सम्यक्त्वेनोभयाभावघटितलक्षणकरणस्य निर्वीजत्वापत्तेः। यदि चोभयाभावघटितलक्षण
करणे नोक्तं वीजं किंतु महाकालीयविशेषणताविशेषस्य संबंधताभ्युपगमे महाकालो घटवान्‌ काल
परिमाणादित्यादौ तेन संबंधेन साध्यतायां निरुक्तप्रतियोगिव्यधिकरणहेत्वधिकरणावृत्त्यभावाप्रसि
द्धेः। व्याप्तिर्न वीजं न चैतादृशसंबंधे प्रमाणाभावेन नैवमिति वाच्यं तु स्पष्टं दुर्ज्ञानमिति न्यायेन तत्त्वादिध
वीजसंभवादिति विभाव्यते। न चापि कदाचिदुक्तमोभयपवान्नध्यमादित्यादावव्याप्तिः। कपिसंयोगेतत्त्वावि
शेषभयप्रतियोगिकस्यात्मत्वेन तत्त्वघटितोभयाभावस्य साध्यतावच्छेदकसंबंधसंयोगसामान्ये सत्त्वात्‌। य

© Dharmartha Trust. Digitized by eGangotri

२५ द्विवसाध्यसाधनभेदेन व्याप्तिलक्षणस्य विभिन्नतयातत्प्रतियोगिवैयधिकरण्यप्रवेशेऽप्रतियोगिताव
च्छेदकवैशिष्ट्यस्य निवेशे पूर्वलक्षणकरणोऽव्याप्त्यनुपपत्तिः। उपदर्शितस्थले साध्यतावच्छेदकसंबंधेन तद्रूप
25 वनिष्ठप्रतियोगितानिरूपकैकप्रतियोगिकत्वस्य सत्त्वेन तद्वृत्तितोभयाभावासत्त्वादिति विभाव्यते तथापि व
ह्निधूमोभयधान्यवृत्तिमात्रावति व्याप्तिदुर्वारैवेत्युपदर्शितरीत्या साध्यतावच्छेदकसंबंधसामान्येन तथा
विधोभयाभावासत्त्वादिति: यत्तु प्रतियोगितावच्छेदकविशिष्टप्रतियोगिकत्वेसत्यप्रतियोगितावच्छेदकप्र
कारकप्रमात्वकत्तानीयसांसर्गिकविषयतावत्त्वेसत्यधिकरणोभयसाध्यकसद्धेतावव्याप्तिः। पर्वतेव
ह्नितथाविधसंयोगद्रूपितथाविधसांसर्गिकविषयतासत्त्वेऽपि निरूक्तोभयाभावासत्त्वात्तन्नाप्युपदर्शितस्थ
लेऽतिव्याप्तिः। साध्यतावच्छेदकसामान्यान्तर्गतसमवायोगोत्वकवृत्तिसंयोगेतथाविधसांसर्गिकविषय
तासत्त्वेन निरूक्तोभयाधीभावासत्त्वादिति। नन्वेवं तथापि समवायस्यैकत्वे सत्तावान्भावत्वादित्यादावति
व्याप्तिः। एकस्मिन्सत्तासमवाये गुणानुयोगिकत्वसत्ताप्रतियोगिकत्वोभयसत्त्वेन तथाविधोभयाभावासत्त्वा एम०
त्। अथ गगनादेः शब्दाद्यव्यवहितपूर्ववर्तित्वाभावकतत्क्षणावाच्छ्यानुपपत्त्याकालिकसंबंधेनगग २५

© Dharmartha Trust. Digitized by eGangotri

नाद्यः नित्यपक्षे महाकालोपाधित्वात्कालपरिमाणादित्वाद्यभावस्यातिव्याप्तिर्दुर्वारा तत्र तादृशोभयसं
बंधेन प्रतियोगितावच्छेदकत्वमप्रसिद्धं तत्र हेत्वधिकरणवृत्त्यधिकरणानायादप्रसिद्धत्वादिति चेत्तर्हि स्वरूपसं
बंधरूपकारणं त्वस्यावश्यकत्वात्पागगनादेस्तेन संबंधेन वृत्तिमत्त्वानभ्युपगमात्. अथवा प्रतियोगिता
वच्छेदकसंबंधेन प्रतियोग्यधिकरणे प्रतन्मिन्त्रे हेत्वधिकरणवृत्त्यभावीयप्रतियोगितासामान्ये यत्संबंधा
वच्छिन्नत्वपर्याप्तिरावच्छिन्नत्वाभावः तेन संबंधेन यत्र पर्याप्तिरवच्छिन्नाधिकरणं तद्भिन्नत्वं व्याप्तिः एवं
च कालिकसंबंधेन गगनादेर्वृत्तिमत्त्वपक्षेपि न क्षतिः ननु यादृशसमवायावच्छिन्नप्रतियोगिताकाभावमा
दाय एवं तत्र लक्षणं संभवात् अथ तथाविधायत्संबन्धतावच्छेदकावच्छिन्नप्रतियोगितापर्याप्तसंबंधाव
च्छिन्नत्वाभावसत्त्वं तेन संबंधेन तदवच्छिन्नसामानाधिकरण्यं व्याप्तिरिति प्रसंगेऽसंभवस्य तत्त्वे तदभावाभावघटि
तलक्षणघटकीभूताभावरूपतिचेन्न. प्रमेयवान् ज्ञानत्वादित्यादौ समवायेन साध्यताया हेत्वधिक
रणवृत्तिप्रमेयत्वावच्छिन्नाभावाप्रसिद्ध्याऽव्याप्त्यापत्तेः न च संयोगसंबंधावच्छिन्नप्रतियोगिताकप्रमे
यत्वावच्छिन्नाभावस्यैव तत्राप्रसिद्धेरिति वाच्यं. तादृशाभावस्य संयोगसंबंधावच्छिन्नत्वाव

© Dharmartha Trust. Digitized by eGangotri

च्छिन्नप्रतियोगिताकाभावत्वमनिषपतत तथा लाघवात् । द्रव्यत्व एव तत्प्रतियोगितावच्छेदकत्वांगीकारेण तथा
२५ वक्तुमशक्यत्वादिति । उभयाभावघटितलक्षणे तु तत्र समवायसंबंधावच्छिन्नप्रतियोगिताकघटाभाव
25 मादायैव लक्षणसमन्वयसंभव इति ध्येयं ॥ श्रीगणेशाय नमः ॥ ननु अत्र प्रथमलक्षणे किमवच्छेदकत्वं नना
वत्स्वरूपसंबंधविशेषः । घ्राणग्राह्यगुणत्वव्याप्यजातिमानयं द्रव्यत्वादित्यादावव्याप्तेः । तत्र साध्यता
वच्छेदकस्य स्वसमनियतगंधत्वापेक्षया गुरुत्वेनाभावप्रतियोगितायाः स्वरूपसंबंधरूपावच्छेदकत्वाभा
वक्तव्यात्तु न एवं तथाविधाभावप्रतियोगितानवच्छेदकत्वात्तन्नाव्याप्तिरिति । वृत्तित्वं तत्तत् । तस्य हेत्वधिकरणवृ
त्तितदभावीयप्रतियोगितात्वावच्छिन्नाभाववद्वृत्तिसमानतमत्वार्थकत्वेन प्रमेयवान् मेयत्वादित्यादौ समवा
येन साध्यतायां व्यभिचारिण्यतिव्याप्तिः । समवायसंबंधावच्छिन्नप्रतियोगिताकाभावप्रतियोगित्वाभावा
प्रसिद्ध्या तदभावस्य तथाविधतत्तदभावानंतर्गतत्वेन घटपटाभावात्मकतथाविधतत्तदभावघटितनि
रुक्तमतमभिन्नत्वस्य तत्र सत्त्वात् । परिचयस्यान्यत्र वृत्तिहेत्वधिकरणवृत्तितत्तदभावीयप्रतियोगितासामा एमं०
न्यकं यथा तत्तदन्यतमत्वेन तद्रूपैः । न तावद्वह्निमान् धूमादित्यादौ वह्नित्वाद्यवच्छेदकलक्षणातिव्याप्तेः । तथा २५

© Dharmartha Trust. Digitized by eGangotri

विघतत्रद्भावांतर्गततार्णतार्णोभयाभावीयप्रतियोगितासामान्यस्य वह्नित्वव्यापकत्तयावह्नित्वस्यतादृशान्य
तमात्त्कांतत्वात्· पत्त· हेत्वधिकरणवृत्त्यभावप्रतियोगितावच्छेदकताघटकसंबंधेन तथाविधप्रतियोगिताव
च्छेदकाभावमादाय वह्नित्वेऽवच्छेदकलक्षणातिव्याप्तिः। प्रतियोगितावच्छेदकताघटकसंबंधेन तथाविधप्र
तियोगितावच्छेदकाभावस्य विवक्षिततया तथाविधपर्याप्तिसंबंधेन तदभावस्य वह्न्यावप्रसिद्धत्वात्· हृति
त्वं चात्र साध्यतावच्छेदकताघटकसंबंधेन वोध्यं· नातोऽवच्छेदकलक्षणासंभवः। न चात्र प्रमेयवान् भा
वत्वादित्यादौ समवायेन साध्यतायां तथाविधप्रतियोगितावच्छेदकालक्षणासंभवः। न चात्र प्रमेयवान्
भावत्वादित्यादौ समवायेन साध्यतायां तथाविधप्रतियोगितावच्छेदकप्रमेयत्वाभावाप्रसिद्ध्या प्रमे
यत्वादावव्यवच्छेदकलक्षणाव्याप्तिरिति चेन्न। स्वसमानवृत्तिकहेत्वधिकरणवृत्त्यभावप्रतियोगिताव
च्छेदकं यद्यत्स्वं तावदन्यतमत्वस्य प्रवृत्तेनिवेशात्· स्वसमानवृत्तिकत्वं च स्वपर्याप्त्यवच्छेदकताव्यापको
भूतयत्पर्याप्त्यवच्छेदकताकत्वं। नानत्वाणांतार्णोभयत्वावच्छिन्नाभावमादाय वह्नित्वेऽवच्छेदकलक्षणा
तिव्याप्तिः। अन्यथाऽस्वसामानाधिकरण्यस्य स्वसमानवृत्तिकत्वस्य तदर्थत्वे वह्निमान् धूमादित्यादौ

© Dharmartha Trust. Digitized by eGangotri

२६ तथाविधोभयत्वेनिरुक्तवह्नित्वसमानवृत्तिकत्वसत्वेनवह्नित्वेऽवच्छेदकलक्षणस्यातिव्याप्तिः नचैवं स्वपर्याप्त्य
वच्छेदकावच्छिन्नपर्याप्तिकभिन्नत्वं दलं घटितं तत्र तथाविधव्यापकतापानिवेशनेनेति वाच्यं वह्नित्वादावतिव्याप्ति
वारणासंभवात् तथाविधाभावप्रतियोगितावच्छेदकपायवृत्तित्वपात्वे वह्नित्वपर्याप्त्यवच्छेदकपा
26 वत्वावच्छिन्नपर्याप्तिकत्वसत्वात् नचपायवृत्ते वह्नित्वपर्याप्त्यवच्छेदकत्वमानाभाववृत्तिवाच्यं स्ववह्नीति
प्रतीत्यात् अपि तु स्पेय वह्नित्वपर्याप्त्यवच्छेदकत्ववत् पावीन्वह्नीति प्रतीत्या पावत्वेपि तदवच्छेदकत्वस
भवात् तत्र तथाविधव्यापकतापानिवेशेतु नोक्तानुपपत्तिः वह्नित्वपर्याप्त्यवच्छेदकीभूततत्तज्जलत्वत
पावत्वपर्याप्त्यवच्छेदकत्वाभाववन्निरूपकव्यापकताघटितलक्षणस्य वह्नित्वेऽसत्वात्: एवं क्रमेणोभयस
र्वसाधारणस्वसमानवृत्तिकत्वं चावच्छेदकं नाद्यंतत्वं च स्वपर्याप्त्यधिकरणपर्याप्तिवृत्तिकत्वं दीधि
धितिग्रंथोपायकजातीति कृशाधुलद्दुदुरूढकृतानां मननीति निरुक्तघटितलक्षणे स्वपर्याप्त्यधिकरणप
र्याप्तिवृत्तिकत्वं दीधितिग्रंथोपायकजातिकृशार्दूलदुत्तिकत्वविशेषणानुमवितं भिन्नतद्भवणाभा एन०
समाधानाभावाद्ग्रंथव्याहतस्यादुपेक्षिताः नच यमाद्यंभेदं स्वविषयसीमप्रमाणेन तदेव नयत्पामरहतिचेत् २६

© Dharmartha Trust. Digitized by eGangotri

अयमेकोयंघटः इमौद्वावितिप्रतीतिसाक्षिकस्वरूपसंबंधविशेषरूपापर्याप्तिः केनाप्यपलपितुमश
क्यत्वादिति तदसत्त्वे तादृशप्रतीतेः समवायसंबंधविषयकत्वेनैवोपपत्तौपर्याप्त्याख्यसंबंधेमानाभा
वात् नचएकोनद्वावितिप्रतीत्यन्यथानुपपत्त्यातत्स्वीकारआवश्यकःएकत्वद्वित्वावच्छेद
कःयाभावेनैवतदुपपत्तेः। अन्यथापर्याप्तिस्वीकारेपिनिस्तारः। उभयवतस्तत्त्वेएकत्रतत्स्वीकारस्या
वश्यकत्वेनतत्संबंधावच्छिन्नप्रतियोगिताकाभावस्यैकत्रासत्त्वात् नचपर्याप्तिमाव्रूमस्तिति। साध्य
तावच्छेदकताघटकसंबंधावच्छिन्नव्यापकतावच्छेदकसमानवृत्तिकत्वापत्त्यादिरित्यवाच्यं। तथा
सत्यपिसत्तावान्जातेरित्यादौसत्त्वात्वावच्छेदकलक्षणातिव्याप्तिः हेत्वधिकरणवृत्त्यभावप्र
तियोगितावच्छेदकगुणकर्मान्यत्वविशिष्टसत्तात्वस्यसत्तात्वव्यापकत्वादिति। अत्रकेचित् प्रतियोगिव्यधिक
रणहेत्वधिकरणवृत्त्यभावप्रतियोगितावच्छेदकावच्छिन्नाभाववति असंबंधेनपद्विशिष्टसामान्येतत्वंतस्यावि
याव्वच्छेदकत्वं धूमवान्वन्हेरित्यादौवन्ह्यधिकरणायोगोलकवृत्त्यभावप्रतियोगितावच्छेदकधूमत्वावच्छिन्ना
भाववतिअसंबंधेनधूमत्वविशिष्टसामान्यमितिधूमत्वेलक्षणसमन्वयः। वन्हिमान्धूमादित्यादौनव्याप्ति

© Dharmartha Trust. Digitized by eGangotri

२७ 27 याभावप्रतियोगितावच्छेदकघटत्वावच्छिन्नाभाववतिपर्वतादौ धूमादित्वविशिष्टस्य सत्वद्रुत्याद्यन्नाहीनाति
व्याप्तिः । तथाविधप्रतियोगितावच्छेदकावच्छिन्नाभावश्चात्रप्रतियोगिव्यधिकरणो बोध्यः । अन्यथा धूमवा
न्वन्हेरित्यादौ उत्पत्तिकालावच्छेदेन तथाविधधूमत्वावच्छिन्नाभाववतिपर्वतादौ धूमत्वविशिष्टस्य स
त्वेन धूमत्वेः वच्छेदकलक्षणाव्याप्तेः । प्रतियोगिवैयधिकरण्यं च स्वाश्रयतावच्छेदकसंबंधेन बोध्यं अन्य
था धूमवान्वह्नेरित्यादौ तथाविधधूमत्वावच्छिन्नसमवायसंबंधावच्छिन्नप्रतियोगिताकाभावस्य
प्रतियोगितावच्छेदकसंबंधेन प्रतियोग्यधिकरणस्याभाववतिपर्वतादौ धूमत्वविशिष्टस्य सत्वेन
तेन्नावच्छेदकलक्षणाव्याप्तेः । न च तत्र पारिभाषिकावच्छेदकाप्रसिद्ध्याव्याप्तिलक्षणे नास्यपदप्रसिद्धिरिति वाच्यं । त
थाविधधूमाद्यभाववतिपर्वतादौ गगनत्वविशिष्टस्यासत्वेन गगनत्वस्यैव पारिभाषिकावच्छेदकत्वप्रसि
द्धिसंभवात् । साध्यतावच्छेदकसंबंधसामान्ये यद्भावाधिकरणीमत्वयल्लिङ्गिविघ्नानुयोगिकत्वयद
भावीयपादद्वाप्रतियोगितावच्छेदकविशिष्टप्रतियोगिकत्वोभयाभाववत्तथाविधहेतुव्यधिकरणावृत्तसमा एम०
वप्रतियोगितावच्छेदकावच्छिन्नतादृशप्रतियोगिकतदभावाधिकरणनिष्ठान्योन्याभावे साध्यतावच्छेदक २७

© Dharmartha Trust. Digitized by eGangotri

संबंधघटितत्वसमानाधिकरणोक्तत्ववत्यसंबंधावच्छिन्नप्रतियोगिताकयाद्यप्रतियोगितावच्छेदकाव
च्छिन्नाभावाधिकरणे तथाविधाभावीयतादृशप्रतियोगितावच्छेदकावच्छिन्नाभावाधिकरणमितु
ववाद्वितीयाभावाधिकरणेनाप्यतिव्याप्तिविरोधः। तेन कालो घटवान् कालपरिमाणादित्यादौ ना
पदर्शितरीत्याऽव्याप्तिः। तथाविधसंबद्धत्वं च हेतावच्छेदकसंबंधेन बोध्यं. नातो धूमवान् वह्नेरि
त्यादौ तथाविधमत्त्वावच्छिन्नाभाववद्योगोलकादिनिरूपितकालिकादिसंबंधावच्छिन्नसंबद्धत्व
स्य धूमत्वविशिष्टसत्त्वेपि क्षतिः। एवं च तादात्म्यसंबंधेन साध्यतायां तथाविधवृत्तित्वाप्रसिद्ध्याऽव्या
प्तिरिति वृत्तित्वस्थाने स्वसंबद्धत्वनिवेशः। वह्निमान् धूमादित्यादौ तथाविधाभाववत्पर्वतादिनिरूपि
तघटपटादिनिष्ठसंबद्धत्वाभाववत्त्वं वह्नित्वविशिष्टे सत्त्वात् वह्नित्वेऽवच्छेदकलक्षणातिव्याप्तिरिति
तथाविधसंबद्धत्वसामान्याभावोऽत्र निवेश्यः। वह्निमान् धूमादित्यादौ तथाविधमहानसीयवह्नि
त्वावच्छिन्नाभाववन्निरूपितसंबद्धसामान्याभाववत्त्वं वह्नित्वविशिष्टमहानसीयवह्न्यादौ सत्त्वेन वह्नि
त्वेऽवच्छेदकलक्षणातिव्याप्तिरिति यद्धर्मविशिष्टसामान्यनिवेशः। अत्र च हेतुत्वाधिकरणीभूत

© Dharmartha Trust. Digitized by eGangotri

यत्किंविषयत्वोऽसंवद्धपदार्थविशिष्टसामान्यं सप्ताभिमाषिकावच्छेदकद्मते नैव सर्वसामञ्जस्येऽस्त्विति
२८ ऽभिमोनिरर्थकमिति तु नाशंकनीयं। यथा संनिवेशो वैयर्थ्याभावात्। न च त्रपदार्थवैशिष्ट्यं केनैव संबंधेन नि
28 वेश्यं केन न तावत्साध्यतावच्छेदकताघटकसंबंधेन। कालो ध्वंसवान् महाकालपरिमाणादित्यादौ तथा
विधपाभिमाषिकावच्छेदकाप्रसिद्ध्यापत्तेः। गगनत्वस्य ध्वंसत्वीयविशेषणताविशेषरूपसाध्यता
वच्छेदकताघटकसंबंधेन वैशिष्ट्याभावेन तथाविधपाभिमाषिकावच्छेदकत्वविरहात्। तन्मात्रापतनादमा
वस्यस्पष्टत्वात्। नापि हेत्वधिकरणवृत्त्यभावीयप्रतियोगितावच्छेदकताघटकसंबंधेन घटाभिन्न
प्रमेयत्ववैशिष्ट्यस्याप्रसिद्ध्या घटाभिन्नप्रमेयत्वस्य पाभिमाषिकावच्छेदकत्वक्षतेः। नापि साध्यताव
च्छेदकताघटकसंबंधप्रतियोगितावच्छेदकताघटकसंबंधान्यतरसंबंधेन तत्। कालिकसंबंधेन घट
त्ववैशिष्ट्यस्य कालिकसंबंधेन साध्यतायां महाकालपरिमाणादिहेतौ तथाविधपाभिमाषिकावच्छेदका
प्रसिद्ध्यापत्तेः। न च गगनत्वमेव तत्र तथाविधपाभिमाषिकावच्छेदकं प्रसिद्धमिति वाच्यं। तथावि ए०प्र०
धान्यतरसंबंधाक्रान्तकालिकसंबंधेन गगनत्वविशिष्टघटादेस्तथाविधाभावप्रतियोगितावच्छेदकग २८

न त्वावच्छिन्नाभाववत् कालनिरूपितसाध्यतावच्छेदककालिकसंबंधावच्छिन्नसंबद्धत्वस्य सत्वेन तथावत्तु मथ
मेत्वात् । न च कालभेदविशिष्टगगनत्वमेव तथा पारिभाषिकावच्छेदकं प्रसिद्धमिति वाच्यं । तथापि तादृ
श्यो तद्धर्मसंबंधिनः संयोगेन साध्यतायां अमिच्याप्तिरपि तिव्याप्तेः । तथाविधप्रतियोगितावच्छेदकच स
त्वावच्छिन्नाभाववत्प्रतियोगितावच्छेदकता घटकसमवायसंबंधेन धर्मविशिष्टस्य धर्मान्तरं मकूपमे
णवादेः सत्वेन धर्मस्य पारिभाषिकावच्छेदकत्वासंभवात् । यदि च तत्र धर्मत्वमेव साध्यतावच्छेदकमि
त्युच्यते तदा संबंधसामान्येन घटत्वविशिष्टस्य कालिकसंबंधेन साध्यतायां कालपरिमाणादिहेतौ त
थाविधपारिभाषिकावच्छेदकाप्रसिद्ध्याऽव्याप्तेः लक्षणे पिवाऽपितु मप्राक्तत्वात् । नापि संबंधसामान्येन
तथाविधाभाववन्निरूपितसंबद्धत्वाभावस्य संबंधसामान्येनागगने कालिकसंबंधेन घटत्वगगनत्वादि
विशिष्टे सर्वत्र सत्वात् तथाविधपारिभाषिकावच्छेदकाप्रसिद्ध्याऽसंभवापत्तेरिति चेन्मैवं । तथाविधाभावव
न्निरूपितसंबद्धत्वाभावः येन येन संबंधेन यद्घटत्वविशिष्टे तिष्ठति तत्तत्संबंधावच्छिन्नतत्तद्धर्मनिष्ठप्रका
रतात्वस्यैव पारिभाषिकावच्छेदकत्वस्य पत्वात् । नैवं संसर्गांशे प्रकारितासिः । न तथाविधप्रकारतात्मकत्वमे

© Dharmartha Trust. Digitized by eGangotri

दकं द्रवतीसाध्यतावच्छेदकताघटकसंबंधावच्छिन्नप्रतिसाध्यतावच्छेदकनिष्ठप्रकारतातत्साध्यतावच्छेदकावच्छि
२९ 29 न्नसामानाधिकरण्यप्रत्यव्याप्तिप्रदर्शितत्वादित्याहुः। तदसत्। गुणकर्मान्यत्वविशिष्टसत्तावान् जातेरित्यत्रा
तिव्याप्तेः। तथाविधाप्रतमानिविष्टत्वादिति। परे तु। तथाविधहेत्वधिकरणवृत्त्यभावप्रतियोगितावच्छेदक
पदं धर्मविशिष्टसंबंधिनिष्ठाभावप्रतियोगितानवच्छेदकं यद्धर्मः पारिभाषिकावच्छेदकः। न चैवं सति गुणक
र्मान्यत्वविशिष्टसत्तावान् जातेरित्याद्यव्याप्तिः। तथाविधाभावप्रतियोगितावच्छेदके गुणकर्मान्यत्व
विशिष्टसत्तात्वाविशिष्टसंबंधिनिष्ठाभावप्रतियोगितानवच्छेदकत्वेन गुणकर्मान्यत्वविशिष्टसत्तात्व
स्य पारिभाषिकावच्छेदकलक्षणाक्रान्तत्वात्। साध्यतावच्छेदकसंबंधेन संबंधित्वं वाच्यं। तत्तथाविधप्र
तियोगितावच्छेदकमात्रस्यैव कालिकादिसंबंधेन स्वविशिष्टसंबंधीयत्तन्निष्ठाभावप्रतियोगितावच्छेदकत्वे
न सन्देहत्वात् तथाविधपारिभाषिकावच्छेदकाप्रसिद्ध्याऽसंभवः। तथाविधसंबंधिनिष्ठाभावोऽपि प्रतियोगिव्य
धिकरणो बोध्यः। अन्यथा संयोगसंबंधेन साध्यतायां हेत्वधिकरणवृत्त्यभावप्रतियोगितावच्छेदकमात्रस्यै एम॰
व साध्यतावच्छेदकसंयोगसंबंधेन यद्धर्मविशिष्टसंबंधीयत्तन्निष्ठाभावप्रतियोगितावच्छेदकत्वेन सन्देहत्वपु २९

© Dharmartha Trust. Digitized by eGangotri

तथाविधपर्याप्तिकावच्छेदकप्रसिद्ध्यानाव्याप्तिः प्रतियोग्यसामानाधिकरण्यं च साध्यतावच्छेदकसं
बंधेन प्रतियोगितावच्छेदकावच्छिन्नानधिकरणवृत्तित्वं बोध्यं॥ अतो वह्निमान् धूमादित्यादौ हृत्वविधिक
रणवृत्त्यभावप्रतियोगितावच्छेदकघटत्वादेः वह्नित्वविशिष्टसंबंधिनिष्ठापरसंबंधसामान्येन प्रतियो
गिव्यधिकरणोऽतीततत्संघजोभाववृत्तप्रतियोगितानवच्छेदकत्वेऽपि न वह्नित्वादाववच्छेदकलक्षणा
तिव्याप्तिः प्रतियोगितावच्छेदकावच्छिन्नत्वस्योपादाने सत्तावान् जातेरित्यादावतिव्याप्तिः स्फुटैव तथा च
साध्यतावच्छेदकसंबंधावच्छिन्नपादृशप्रतियोगितावच्छेदकावच्छिन्नानिष्ठप्रतियोगितावच्छेदकतानाक
मद्धेविकरणायद्धर्मविशिष्टसंबंधिनिष्ठाभाववतादृशप्रतियोगितानवच्छेदकमित्यभावांतायनिष्कर्षः
नचैवं सतिवह्निमान् धूमादित्यादौ वह्नित्वेऽवच्छेदकलक्षणानिव्याप्तिः तत्र तथाविधाभावप्रतियो
गितावच्छेदकगगनत्वादेर्वह्नित्वविशिष्टसंबंधिनिष्ठनिरूढप्रतियोगिव्यधिकरणाभावप्रतियोगि
तानवच्छेदकत्वादितिवाच्यं साध्यतावच्छेदकसंबंधघटितस्वसमानाधिकरणैकत्वत्वसंबंधाव
च्छिन्नप्रतियोगितावच्छेदकपादृशप्रतियोगितावच्छेदकावच्छिन्नाभाववत्वस्यैव तथाविधसंबंधिनिवे

© Dharmartha Trust. Digitized by eGangotri

३०
30

गात्·एवं चतथ्याविग्रहे त्वधिकरणवृत्त्यभावप्रतियोगिनावच्छेदकं यद्धर्मविशिष्टसंबंधिनिष्ठाभावीय
ताद्दशप्रतियोगितानवच्छेदकं सधर्मः पारिभाषिकावच्छेदकः इति समुदितलक्षणवाक्यार्थः।नचावच्छे
दकलक्षणमविशिष्टप्रतियोगिवेप्यधिकरणशरीरे प्रतियोगिनावच्छेदकावृत्तित्वनिवेशनं घटक
गुणकर्मान्यत्वविशिष्टसत्तावान् जातेरित्यादौ प्रतियोगि अधिकरणजात्यधिकरणीभूतामावप्रति
योगितावच्छेदकद्रव्यत्वादेर्गुणकर्मान्यत्वविशिष्टसंबंधिनिष्ठाभावप्रतियोगितानवच्छेदकत्वेन गु
णकर्मान्यत्वविशिष्टसत्तात्वादेः पारिभाषिकावच्छेदकत्वसंभवेनानुपपत्त्यभावादिति वेन्न एतद्रूपान्य
त्वविशिष्टसत्तावान् जातेरित्यादावतिव्याप्तेः तथाहि साध्यतावच्छेदकसंबंधघटितगुणप्रतियोगि
अधिकरणे हेत्वधिकरणवृत्त्यभावप्रतियोगितावच्छेदकगगनत्वादेः एतद्रूपान्यत्वविशिष्टसत्तात्ववि
शिष्टाधिकरणवृत्तिनिरूपकप्रतियोगि अधिकरणाभावप्रतियोगितावच्छेदकत्वेन एतद्रूपान्यत्वविशि
ष्टसत्तात्वं न पारिभाषिकावच्छेदकं किंतु घटत्वादिकं तथाविधाभावप्रतियोगितावच्छेदकघटत्वादि
विशिष्टनिष्ठप्रतियोगि अधिकरणाभावप्रतियोगि अधितानवच्छेदकत्वात्·एवं च एतद्रूपान्यत्ववि एस० ३०

© Dharmartha Trust. Digitized by eGangotri

शिष्टसत्त्वादेस्तथाविधपारिभाषिकावच्छेदकभिन्नत्वाज्ज्ञानिष्ठात्किं तत्र प्रतियोगितावच्छेदकावच्छिन्न
त्वनिवेशेन तु नैवं न स्यात्तथाविधाभावप्रतियोगितावच्छेदके तद्रूपान्यत्वविशिष्टसत्तात्वादेः एतद्रूपान्यत्व
विशिष्टसत्तात्वविशिष्टसंबंधिनिष्ठाभावप्रतियोगितानवच्छेदकत्वेन एतद्रूपान्यत्वविशिष्टसत्तात्वस्य पा
रिभाषिकावच्छेदकत्वसंभवादितिहित्वधिकरणवृत्त्यभावीयप्रतियोगिवैयधिकरण्यप्रकारेऽपि प्रतियोगितावच्छे
दकावच्छिन्नत्वनिवेशनमावश्यकमेवेति साम्प्रतमिति वदंति। तदपि न विचारसहं। महाकालो घटवान् कालप
रिमाणादित्यादौ तथाविधपारिभाषिकावच्छेदकाप्रसिद्ध्याऽव्याप्तेः। न च तत्र गगनत्वादिकमेव पारिभा
षिकावच्छेदकं गगनत्वविशिष्टसंबंधाप्रसिद्ध्या यद्धर्मपदेन गगनत्वस्य उपादानासंभवात् ननु महाकाला
न्यत्वविशिष्टघटत्वमेव न व्याप्यवृत्तीति वाच्यं। महाकालीयविशेषणताविशेषाभ्युपगमे तेन संबं
धेन साध्यतायां महाकालान्यत्वविशिष्टघटत्वविशिष्टस्य साध्यतावच्छेदकसंबंधेन संबंधिनोऽप्रसिद्ध्या न स्या
पि तथा वक्तुमशक्यत्वात्। अत्र वदन्ति। साध्यसाधनभेदेन लक्षणभेदात् महाकालीयविशेषणता
ताविशेषसंबंधेन घटादेः साध्यतायां महाकालपरिमाणादिरूपसद्धेतौ हि त्वधिकरणावृत्त्यभावप्रति

© Dharmartha Trust. Digitized by eGangotri

३१ 31 योगितावच्छेदकावच्छिन्नाभाववत्तित्वस्य संबद्धं यद्धर्मविशिष्टसामान्यं तद्धर्मभिन्नसाध्यतावच्छेदका
वच्छिन्नसामानाधिकरण्यं व्याप्तिरिति लक्षणं करणीयं अत्र मन्मते तु यथाविधहेत्वधिकरणवृत्त्यभा
वप्रतियोगितावच्छेदकयद्धर्मविशिष्टसंबंधिनिष्ठाभावीयप्रतियोगितानवच्छेदकं तद्धर्मभिन्नसा
ध्यतावच्छेदकसंबंधसामान्ये हेत्वधिकरणीभूतयत्किंचिदधिकरणानुयोगिकत्वयद्धर्मविशिष्टप्रति
योगिकत्वोभयाभावः स धर्मः पारिभाषिकावच्छेदकः एवं च महाकालो घटवान् कालपरिमाणा
दित्यादावपि गगनत्वादेः पारिभाषिकावच्छेदकत्वोपपत्तिः सुखेन निर्वहतीति न कोऽप्यनिष्टमित्येके
तिप्राहुः नव्यास्तु पदार्थावच्छिन्नस्य येन संबंधेन संबंधिनिरूपितमानस्य तेन संबंधेन प्रतियोगिव्य
धिकरणाभावस्य प्रतियोगितानवच्छेदकं हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकं तेन
संबंधेन तद्रूपावच्छिन्नविशिष्टावृत्तिविषयतावान्यः साध्यतावच्छेदकसंबंधेन साध्यतावच्छे
दकावच्छिन्नविशिष्टत्वं हेतुत्वं च व्याप्तिः कालो घटवान् महाकालपरिमाणादित्यादौ वृत्तात्मत्व एम०
संबंधेनागगनत्वविशिष्टसंबंधिनः प्रसिद्धानव्याप्तिरितिप्राहुः केचित्तु यद्धर्मविशिष्टसंबंधी सन् ३१

© Dharmartha Trust. Digitized by eGangotri

संबंधित्वसाध्यतावच्छेदकसंबंधतादात्म्यसंबंधान्यतरसंबंधेनैववाच्यं॰ तन्निष्ठाभावप्रतियोगित्वमपि
तथाविधान्यतरसंबंधेनैववाच्यं एवंच महाकालोघटवान्कालपरिमाणादित्यादौनप्रतिभाषिकावच्छे
दकाप्रसिद्ध्याव्याप्तिः॰ तथाविधान्यतरसंबंधेनगगनत्वादिविशिष्टसंबंधिनिगगनेतथाविधान्य
तरसंबंधावच्छिन्नप्रतियोगिताकगगनाभावासत्वेनगगनत्वस्यैवप्रसिद्धत्वादित्याहुः॰ तदसत्तद्व
त्तानियामकसंयोगसंबंधेनसाध्यतायांअवच्छेदकत्वस्यगुणस्यशब्दसमानाधिकरणवह्नित्वेऽ
तिप्रसंगः॰ तथाविधाभावप्रतियोगितावच्छेदकगगनत्वादेः तथाविधान्यतरसंबंधेनशब्दसमा
नाधिकरणवह्नित्वविशिष्टसंबंधियद्गगनंवह्नित्वेतदप्रसिद्ध्यात्तथाविधान्यतरसंबंधावच्छिन्नप्रति
योगिताकगगनाभावस्याप्रसत्वेनतथाविधाभावप्रतियोगितानवच्छेदकत्वादित्यलमसदुपवे
क्षेन॰ एवंप्रतियोगिताधर्मिकोभयाभावघटितव्याप्तिलक्षणेपियद्रूपावच्छिन्नेस्वत्वावच्छेद
कत्वेनस्वरूपसंबंधःप्रमेयवह्निमान्धूमादित्यादौप्रमेयवह्नित्वेस्वरूपसंबंधावच्छेदकत्वात्प्र

© Dharmartha Trust. Digitized by eGangotri

३१ सिद्धाप्राप्तेः। न च तत्र विषयतया हेतुतावच्छेदकत्वमसिद्धमप्रसिद्धं कथं व्याप्तिसंभव इति वाच्यं। प्रमेयधूमवान्वह्ने
32 रित्यादौ व्याप्तिवारणाय धूमाभावीयप्रतियोगितावच्छेदकत्वनिरूपकावच्छेदकतावच्छिन्नत्वस्यैव तत्र निवेशेनोप
दर्शितस्थले तथाऽप्रसिद्ध्या व्याप्तिसंभवात्। नाप्यनतिरिक्तवृत्तित्वं तत्र तत्र वह्निमान्द्रव्यत्वादिना हेतुतयाविधा
भावीयमहानसीयवह्नित्वावच्छिन्नसंयोगसंबंधावच्छिन्नप्रतियोगितायां वह्नित्वानतिरिक्तवृत्तिमहानसीय
वह्नित्वावच्छिन्नत्वसंयोगसंबंधावच्छिन्नत्वोभयसत्त्वेनाव्याप्तेः। किंतु स्वानतिरिक्तवृत्तित्वं तत्त्वं व्यापकत्वेन व्याप्तत
याविधाभावीयप्रतियोगितायां यद्धर्मविशिष्टसंबंधिवृत्तिप्रतियोगिताधिकरणाभावप्रतियोगितानव
च्छेदकावच्छिन्नत्वसाध्यतावच्छेदकसंबंधावच्छिन्नत्वोभयाभावः साध्यतावच्छेदकसंबंधेन तद्धर्मावच्छिन्नसा
मानाधिकरण्यं व्याप्तिरित्युक्तरीत्या लक्षणनिष्कर्षः। प्रमेयवह्निमान्धूमादित्यादौ हेतुतयाविधहेत्वधिक
रणवृत्त्यभावीयघटादिनिष्ठप्रतियोगितायां प्रमेयवह्नित्वविशिष्टसंबंधिनिष्ठाभावप्रतियोगितावच्छेदकत्वा
त्संयोगसंबंधावच्छिन्नप्रतियोगिताकघटत्वादिनाभाववत्संयोगसंबंधावच्छिन्नप्रतियोगिताकत्वाभाववत् व्या०
मानिपततेयाहान् लक्षणलाघवेन तदवच्छेदकत्वास्फुटमामाहः। अभावप्रतियोगिवैयधिकरण्यविशे ३९

© Dharmartha Trust. Digitized by eGangotri

मण्यामप्येतद्दूषणकमेवमत्र न व्याप्यमेवानवच्छेदित्वादुपपादितं शिवादिना आस्थेः तथाविधाभावीयधर्मत्वा
वच्छिन्नप्रतियोगितायां तथाविधप्रतियोगितानवच्छेदकघटत्वेन त्वावच्छिन्नत्वादिघटितोभयाभावस्तत्वा
न्तः तदानेन तत्र नास्ति व्याप्तिः न चायं मत्वस्यापि तादात्म्यप्रतियोगितानवच्छेदकतया तदवच्छिन्नघटितोभया
भावस्य तथाविधधर्मत्वावच्छिन्नप्रतियोगितायामसत्वात् प्रतियोगिवैयधिकरण्यं च प्रतियोगिता
वच्छेदकसंबंधेन अत्र न व्याससंबंधस्याभाव्ये न प्रतियोगिव्यधिकरणवह्नित्वविशिष्टसंबंधिनिष्ठाभावप्रति
योगितानवच्छेदकघटत्वावच्छिन्नत्वादिघटितोभयाभावस्य तथाविधाभावीयघटत्वावच्छिन्नसंयोगसंबं
धावच्छिन्नप्रतियोगितायामसत्वेन वह्निमान् धूमादित्यादावव्याप्त्यापत्तेः । एवं प्रतियोगित्वमपि साध्यतावा
च्छेदकसंबंधेन बोध्यं अत्र न व्याप्यमेवानवच्छेदिस्यादेवेति आपत्तेः । तथाहि द्रव्याभावधूमवद्भिन्न
त्वादेरेव धूमत्वविशिष्टसंबंधिनिष्ठाभावीयसंयोगसंबंधस्याभावावच्छिन्नप्रतियोगितानवच्छेदकतया तथा
विधाभावीयधर्मत्वावच्छिन्नसंयोगसंबंधावच्छिन्नप्रतियोगितायां तथाविधप्रतियोगितानवच्छेदक
वच्छिन्नत्वघटितोभयाभावस्तत्वात् ननु तथाविधाभावेतरत्वे कथं संबंधस्याभावावच्छिन्नप्रतियोगि

© Dharmartha Trust. Digitized by eGangotri

ताकाभावप्रतियोगितामवच्छेदकमिति चेद्द्वयोर्हि संयोगसमवायादिसंबंधावच्छिन्नप्रतियोगिताकतथावि
३२ धाभावतदभावस्य प्रतियोगितावच्छेदकं धूमवत्त्वं तदभावस्य तथाविधसंबंधावच्छिन्नप्रतियोगिताकधू
33 मवदभावसमनियततया लाघवेन तत्रैव तदवच्छेदकत्वस्वीकारात् एवं दैशिकविशेषणताविशेष
संबंधावच्छिन्नप्रतियोगिताकतदभावस्य प्रतियोगितावच्छेदकं हृदत्वाभाववत्त्वं तदभावस्य दैशिक
संबंधेन हृदत्वाभावाभावस्य समनियततया लाघवेन तत्रैव तदवच्छेदकत्वस्वीकारात् एवं विषयतादि
संबंधावच्छिन्नप्रतियोगिताकतदभावस्यापि प्रतियोगितावच्छेदकं धूमत्वं हृदत्वाभाववत्त्वं वा उक्तमु
नेः न च विषयितासंबंधावच्छिन्नप्रतियोगिताकाभावस्यैव तथाविधाभावत्वं प्रतियोगितावच्छेदकं
विषयितासंबंधावच्छिन्नप्रतियोगिताकतदभावस्य विषयितासंबंधावच्छिन्नप्रतियोगिताकधूमवद
भावाभावासमनियततया धूमवत्त्वादेस्तत्प्रतियोगिताकतदभावस्यावच्छेदकत्वासंभवादिति वाच्यं वि
षयितासंबंधावच्छिन्नप्रतियोगिताकतथाविधाभावतदभावस्यापि विषयितासंबंधावच्छिन्नप्रतियोगि एम·
ताकधूमवदभावविषयितासंबंधावच्छिन्नप्रतियोगिताकहृदत्वाभावाभावोभयसमनियततया हृ ३२
दत्वाभाववत्त्वधूमवत्त्वोभयस्यैव तथाविधाभावतदभावप्रतियोगितावच्छेदकत्वाभ्युपगमात् तत्तथावि

© Dharmartha Trust. Digitized by eGangotri

धाम्यतरत्वापेक्षयातद्भेदस्य लघुत्वादिति तथाविधान्यतरत्वस्य प्रतियोगितानवच्छेदकत्वेन युक्तत्वं तथा
विधाभावप्रतियोगितानवच्छेदकतयातथाविधाभावप्रतियोगितानवच्छेदकावच्छिन्नत्वादिघटितोभया
भावस्यतथाविधाभावीयधर्मत्वावच्छिन्नप्रतियोगिताप्रोक्तत्वात् धूमवान् वह्नेरित्यत्रातिव्याप्तिरितिसमा
वीयप्रतियोगित्वं साध्यतावच्छेदकसंबंधेनावच्छिन्नं वाच्यमिति। नच प्रतियोगिवैयधिकरण्यपक्षे एव
साध्यतावच्छेदकसंबंधो निवेश्यतां किं प्रथमपक्षे संबंधविशेषविवक्षया पुनरिति वाच्यम्। एतन्न्यूनत्वस्याग्रेस्फुटी
करिष्यमाणत्वात्। नचात्र महाकालो घटवान् कालपरिमाणादित्यादौ महाकालीयविशेष्यतासं
बंधेन साध्यतायामव्याप्तिः। तत्र घटत्वविशिष्टाधिकरणवृत्तिप्रतियोगितावच्छेदकसंबंधेन प्रतियो
गिव्यधिकरणस्य तथाविधसाध्यतावच्छेदकसंबंधावच्छिन्नप्रतियोगिताकाभावस्याप्रसिद्ध्या उपदर्शि
तलक्षणासंभवादिति चेन्न। प्रतियोगितावच्छेदकसंबंधेन प्रतियोगिव्यधिकरणस्य यद्धर्मविशि
ष्टसंबंधिनिष्ठाभावस्य प्रतियोगितासामान्ये यद्धर्मविशिष्टत्वयत्संबंधावच्छिन्नत्वोभयाभावः तद्धर्माव
च्छिन्नसामानाधिकरण्यं व्याप्तिरितिमतेनैवगतिलक्षणपरिष्करणेन नचैवं सति उपदर्शितस्थलेऽव्याप्तिः

© Dharmartha Trust. Digitized by eGangotri

३४ 34
इदानीं समवायसंबंधावच्छिन्नघटाभावादेरेव प्रतियोगिव्यधिकरणस्याप्रसिद्धिसंभवात् । अत एवात्र प्र
तियोगिवैयधिकरण्यघटितसाध्यतावच्छेदकसंबंधानिवेशः तथा सति उपदर्शितनिरुक्तौ विशिष्टदर्शितन
स्य लक्षणे तत्तत्संबंधेन प्रतियोगिव्यधिकरणस्याभावस्याप्रसिद्ध्या ऽव्याप्तिवारणासंभवात् । वस्तुतस्तु हेत्व
धिकरणवृत्त्यभावप्रतियोगितावच्छेदकविशिष्टाधिकरणवृत्त्यभावयोः प्रतियोगिवैयधिकरण्यमनिवेश्यैव तयोर्विशे
षणताविशेषसंबंधावच्छिन्नप्रतियोगिताकत्वं निवेश्य विशेषणताविशेषसंबंधावच्छिन्नयद्धर्म
विशिष्टसंबंधिनिष्ठाभावप्रतियोगितानवच्छेदकावच्छिन्नघटत्वाभावो हेत्वधिकरणवृत्त्यभावीयविशे
षणताविशेषसंबंधावच्छिन्नप्रतियोगितानात्माभाववृत्तितद्धर्मावच्छिन्नसामानाधिकरण्यं व्याप्तिरित्ये
व निष्कर्षः कारणीभूताभावे प्रतियोगिवैयधिकरण्यानिवेशे च लाघवात् । अथैतादृशलघुत
माविशेषणताविशेषसंबंधावच्छिन्नयद्धर्मविशिष्टसंबंधिनिष्ठाभावीयप्रतियोगितानवच्छेदकावच्छिन्नघटत्व
हेत्वधिकरणवृत्त्यभावीयविशेषणताविशेषसंबंधावच्छिन्नप्रतियोगितानिरूपिततद्धर्मावच्छिन्नसा
मानाधिकरण्यं व्याप्तिरित्येव निष्कर्षः कथं न स्वीक्रियते तत्र तद्धर्मानिवेशे लाघवादिति चेदिष्टत्वात् । वस्तु राम ३४

© Dharmartha Trust. Digitized by eGangotri

तत्तु हेत्वधिकरणवृत्त्यभावीयप्रतियोगितासामान्ये तत्र सामान्यपदं आपादकत्वार्थकं तच्च तथाविधप्रति
योगित्वाधिकरणवृत्त्यभावप्रतियोगितानवच्छेदकावच्छिन्नत्वं पर्यवसितं तथाविधप्रमेयत्वत्वस्य सर्वत्रस
त्वात् धूमवान् वह्नेरित्यादावतिव्याप्तिरिति तादृशप्रतियोगितात्वव्यवस्थानाधिकरणाभावप्रतियोगितानव
च्छेदकं तथाविधप्रतियोगितावच्छेदकावच्छिन्नत्वं तद्घटितं तथा चासंभवः। वह्निमान् धूमादित्यादौ व
ह्नित्वविशिष्टसंयोगसंबन्धावच्छिन्नाभावीयप्रतियोगितावच्छेदकघटत्वप्रकारकप्रमाविशेष्यत्वेनावच्छेद्यत्वा
भावस्य त्रालनीस्येव तथाविधावच्छेद्यत्वान्वयस्य तथाविधाभावप्रतियोगितावच्छेदकत्वात् तथाविधप्रति
योगितानवच्छेदकतादृशप्रतियोगितावच्छेदकावच्छेद्यत्वत्वाप्रसिद्धिरिति न जन्यमनिवेशस्तथा निष्कृ
ष्टत्वावश्यकः। न च वेनोपदर्शितातव्ययतिः परकीयविशिष्टाधिकरणवृत्त्यभावीयप्रतियोगितावच्छेद
कघटत्वं निरूप्यावच्छेद्यत्वाभाववत्त्वं हेत्वधिकरणवृत्त्यभावीयप्रतियोगितानवच्छेदकमित्येवं क्रमेण परिष्का
रसंभवादिति स्वलक्षणं विधेयकेन नवीनानुसारेण पिधर्मभवत्यभावीयप्रतियोगितायाः स्वरूपसंबन्धरूपेणावच्छे
दकतायाः अप्रसिद्धेः गोत्वलानदृशापामपि कंबुग्रीवादिमान्नास्तीत्याकारककंबुग्रीवादिमत्त्वावच्छिन्नप्र
तियोगिताकाभावावगाहिमाः प्रतीतेरनुदयात्। न च तादृशकंबुग्रीवादिमत्त्वप्रतियोगिताभावविषयिणी

© Dharmartha Trust. Digitized by eGangotri

३५ तिवाच्यं तथा सति यत्किंचित्कंबुग्रीवादिमति तादृशप्रतीत्यापत्तेः। तथा च गोत्ववत्तानदशायां जायमानेघ
टत्वधर्मनिष्ठाभावप्रतियोगितावच्छेदकत्वावगाहिज्ञाने जागरूके गुरुत्वधर्मेनाभावप्रतियोगितावच्छेदकत्व
35 प्रसक्तेः साहसमात्रलक्षणया अप्रदेयत्वेयानरूपधर्मस्याभावप्रतियोगितावच्छेदकतयाऽपदर्शितलक्ष
णानियमामुतान्येव समीचीनानीत्याहुः तदसत् गोत्ववत्तानदशायां घटत्वावच्छिन्नप्रतियोगिताकत्व
संबंधेन कंबुग्रीवादिमत्त्वविशिष्टाभावविषयककंबुग्रीवादिमान्नास्तीत्याकारकप्रत्ययस्याभ्युपगमे
नैव सर्वेषामंजस्येतदानीं कंबुग्रीवादिमत्त्वावच्छिन्नप्रतियोगिताकाभावविषयकप्रतीतेरसिद्धेः
न चैवं सति अभावप्रत्यये न्यूनचपितावच्छेदकावच्छिन्नप्रतियोगिताकत्वभानव्यवस्थाभंग इति वाच्यं
प्रमात्मकाभावप्रत्यय एव तादृशत्वस्यापत्तेः। न चैवं सति कंबुग्रीवादिमान्नास्तीत्याकारकप्रतीतेः सर्वत्र
भ्रमत्वापातः घटाभावस्य घटसामान्याभाववति देशे प्रमाणत्वव्यवहारोऽनुपपन्न इति वाच्यं। तथाविधभ्रमवह
रस्यापि भ्रमस्तू लक्षणया अनुपपत्त्यभावात् यत्र गुरुत्वधर्मस्याभावप्रतियोगितानवच्छेदकत्वे ग्रीवाक एम०
मत्त्वविशिष्टसत्त्वादेरवच्छेदकत्वाभ्युपगमेनानुपपत्तिः। लघुद्रव्यनिष्ठाभावप्रतियोगितावच्छेदकत्व ३५

© Dharmartha Trust. Digitized by eGangotri

३६
36

त्वसमनियतगुरुत्वगुणकर्मान्यत्वविशिष्टसत्तावद्भिन्नाभावप्रतियोगितावच्छेदकरूपद्धर्मविशिष्टसंबंधि
निष्ठाभावप्रतियोगितानवच्छेदकं तत्तद्भेदकूटघटितव्याप्तिनिर्वचनात्‌ नच भेदकूटस्य दुर्ज्ञेयत्वात्तत्रैव मि
तिवाच्यं। यन्निष्ठभेदीयावच्छेदकनिष्ठप्रतियोगितानिरूपिताया अवच्छेदकनिष्ठावच्छेदकतानिरू
रूपितायाप्रतियोगित्वनिष्ठावच्छेदकतानिरूपितायाऽभावनिष्ठावच्छेदकतानिरूपिताया वृत्ति
त्वनिष्ठावच्छेदकतानिरूपितायाः संबंधिनिष्ठावच्छेदकतानिरूपितायाः संबंधित्वनिष्ठावच्छेदकतानि
रूपितावच्छेदकतावच्छेदकतावच्छेदकीभूततत्तद्धर्मनिष्ठतद्व्यक्तित्वावच्छिन्नप्रतियोगिताकभेदकूटवत्व
संबंधेन हेत्वधिकरणावृत्त्यभावप्रतियोगितावच्छेदकविशिष्टं यत्साध्यतावच्छेदकं तदवच्छिन्नसामा
नाधिकरण्यस्यैव व्याप्तित्वेनाविनाशत्वधर्मस्याभावप्रतियोगितावच्छेदकं उपदर्शितस्य लघुगुणकर्मा
न्यत्वविशिष्टसत्ताद्रव्यत्वादिव्याप्यत्वसिद्धिरिहातेः नचैवं सति गुरुत्वेऽपि तत्त्वापत्तिः भेदकूटानां सं
बंधघटकत्वेन पर्वतत्वजातिमोगपपादितेरनपेक्षत्वादिति ॥

© Dharmartha Trust. Digitized by eGangotri

न्याय

श्लो० १५००

५१२

© Dharmartha Trust. Digitized by eGangotri